लदंशुनमोहरिंपरंशुभदंसुंदरमंबुजेक्षणं २८ कृतपत्रविचित्रमंडलंसततंकोटिमनोजमोहनं परिपूर्णतमंपरात्परं क
लवेणुध्वनिवादतत्परं २९ तमवेक्ष्यसुतंयदूत्तमोहरिजन्मोत्सवफुल्ललोचनं अयुतंविप्रजनेषुगाश्चवैनियुतंसन्मनसाग
वांददौ ३० हरिमानकदुंदुभिःस्तवैःस्तवनंतंप्रणिपत्यविस्मितः अकरोदुदितप्रभूद्योगतभीःसूतिगृहेकृतांजलिः ३१
वसुदेवउवाच एकोऽसिप्रकृतिगुणैरनेकधासिकर्तात्वं जनकउतास्यपालकस्त्वंनिर्लिप्तःस्फटिकइवात्रदेहवर्णैस्तस्मैश्री॰
भुवनपतेनमामितुभ्यं ३२ यथास्तुत्वनलइवात्रवर्तमानोयोतत्स्थोबहिरपिचैववर्ततेयथाहि आधारेतरणिरिवासिसर्वसाक्षी।
तस्मैतेनमइतिसर्वगोनमस्यात् ३३ भूभारोद्धटहरणार्थमेवजातोगोदेवद्विजनिजवत्सपालकोसि गेहेमेत्रिपुरुषोत्त
मोत्तमस्त्वंकस्मान्मांभुवनपतेप्रपाहिपापात् ३४ नारदउवाच परिपूर्णतमंसाक्षाच्छ्रीकृष्णंपुरुषंपरं ज्ञात्वानत्वाथत
माहदेवकीसर्वदेवता ३५ देवक्युवाच हेकृष्णहेविगणितांडपतेपरेशगोलोकधामधिषणाध्वजआदिदेव पूर्णेशपूर्णप
रिपूर्णतमःप्रभोमांत्वंपाहिपाहिपरमेश्वरकंसपापात् ३६ नारदउवाच तत्श्रुत्वाभगवान्कृष्णःपरिपूर्णतमःस्वयं प्रसन्नोदे
वकीशौरिंप्राहसहृज्जनार्दनः ३७ श्रीभगवानुवाच इयंतुपृश्निःपतिदेवतात्वंपूर्वसर्गेसुतपाःप्रजापतिः तपस्तपेदिव्यत
पोयुताभ्यांकृतंपरंनिर्जलभोजनाभ्यां ३८ कालेषुमन्वंतरयेव्यतीतेतपःपरंतन्मयमौःप्रजार्थे तदाप्रसन्नोयुवयोर्भूवं।
वरंपरंवृतमयातदोक्तं ३९ कृत्वायुवाभ्यांकथितंनदैवभूयात्सुतस्तन्मत्सदृशःकिलाव्ययोः तथास्तुसोक्तायगतोमयिपृ।
ज्ञापतीत्वभूतंस्वकृतेनदंपती ४० नमत्समःकोपिसतोजगत्यलंविचार्यतत्साममभवंपरेश्वरः श्रीपृश्निगर्भोभुविविश्रुतः ४१

गर्ग॰ हीवभूवतुः २६ कलावती कान्यकुब्जे भलंदननृपस्य च जातिस्मरो गोपवरः कामदेववरायरः २७ संबंधं योजयामास नंदराजो
गो॰ महामतिः तयोश्च जातिस्मरयोर्विदुषोर्दिव्ययोर्द्वयोः २८ वृषभानोः कलावत्या आख्यानं शृणुते नरः सर्वपापविनिर्मुक्तः कृष्ण
२९ सायुज्यमाप्नुयात् २९ ॥ इति श्रीमद्गर्गसंहितायां गोलोकखंडे श्रीनारदबहुलाश्वसंवादे श्रीराधिकाजन्मवर्णनं नामाष्ट
मोऽध्यायः ८ ॥ श्रीनारद उवाच तत्रैकदा श्रीमथुरापुरे वरे प्रणोदितः सर्वयदूत्तमैः कृतः भूरेत्वयागर्ग इति प्रमाणिकः समा
ययौ स्वद्वराजमंदिरं १ हीरावलिविहैमलसत्कपाटकं हि पैंदकर्णाहतभृंगनादितं इभश्रवन्निर्करगंडधारया समार्द्रितं मंड
पखंडमंदिरं २ महोद्भटैर्वीरजनैः सकंचुकैर्धनुर्द्धरैः श्रमंकृपाणपाणिभिः रथद्विपाश्वध्वजिनीवलालिभिः सुरक्षितं मंडलमंड।
लीभिः ३ ददर्श गर्गो नृपदेवमाहुकं सुफल्किनादेवकसंसेवितं श्रीशक्रसिंहासनउन्नते परे स्थितं हृतं छत्र विना न चाम
रैः ४ दृष्ट्वा मुनिं तं सहसासनाद्यदुत्थाय राजा प्रणनाम यादवैः संस्थाप्य संपूज्य सुभद्रपीठके स्तुत्वा परिक्रम्य ततः स्थितोभ
वत् ५ दत्वाशिषं गर्गमुनिर्नृपाय वै पप्रच्छ सर्वं कुशलं नृपादिषु श्रीदेवकं प्राह महामना ऋषिर्महौजसं नीतिविदं यदूत्तमं ६
श्रीगर्ग उवाच शौरिं विना भुवि नृपेषु वरस्तु नास्ति चिंत्यं मया बहुदिनैः किल यत्र तत्र तस्मात्त्वदेव वसुदेवपराय देहि श्रीदेव
कीं निजसुतां विधिनोद्वहस्व ७ श्रीनारद उवाच श्रुत्वा ततो देवकोऽपि निश्चयनागवल्ली श्रीदेवकी सकलधर्मभृतां वरिष्ठः गर्गोक्त
मानवसुदेववराय पुत्रीं कृत्वाथ मंगलमलं प्रददौ विवाहे ८ कृत्वोद्वहः शौरिरतीवसुंदरं रथं प्रयाणे समलंकृतं हयैः सार्द्धं त॰
यादेवकराजकन्यया समारुरोह कांचनरत्नशोभया ९ स्वसुः प्रियं कर्तुमतीव कंसो जग्राह रश्मीन् स्खलतां हयानां उवाह वाहांश्च व
तुरंगिणीभिर्वृतः कृपालुःस्नेहपरोऽथ शौरेः १० दासीसहस्रं त्वयुतं गजानां सत्वारवं द्वे नियुतं हयानां ललेरथानां च गवां द्विल
लं प्रशशंसु दुहित्रे नृपदेवकोऽपि ११ भेरीमृदंगगोमुखधुंधुरीणां वीणानकवेणुकानां महत्स्वनोऽभूच्चलतां यदूनां प्रयाण।
काले पथि मंगले च १२ आकाशवाणाहतदेवकं संत्रामय मोहि प्रसवो जसास्याः हंतानजानासि वधं रथस्थो रश्मीन्गृहीता २९

वहस्वैनां सुयन्त्रं १३ कुसंगतिर्हि तनिवेलोहितं कंसो हंतुं स्वसारं धिषणां चकार कचे गृहीत्वा सितखड्गपाणिर्गतत्रपो निर्दय उग्र
कर्मा १४ वादित्रकारा रहिता बभूवुरग्रे स्थिताः सुस्मितकि नादिपश्चात् सर्वे शुचार्तेन जनेषु सत्सु शौरिस्तमाहाशु सतां वरिष्ठः
श्रीवसुदेव उवाच भोजेंद्र भोजकुलकीर्तिकरस्त्वमेव भौमादिमागधवकासुरवत्सबाणैः श्लाघ्या गुणास्तव युधि प्रतियुद्ध
कामैः स त्वं कथं नु भगिनीमसिनात्र हन्यात् १५ ज्ञात्वा स्त्रियं किल वकीं शनियोद्धुकामो युद्धं कृतं न भवता नृपनीतिवृत्त्या सा
त्वं यापि भगिनी वकुला प्रशांत्यै सा ताडिता न भगिनी किमु ते विचारात् १६ उद्वाहपर्वणि गता च नवात्रजा च वाला स्वतेव
कृपणा शुभदा सुतैषा योग्योसि नात्र मम शत्रुपथि पदं ते मे नां सदीन दुःखहरणे कृतविनम्रवृत्तिः १८ श्रीनारद उवाच नाम।
न्यते स्वयं प्रतिवोधितोपि कुसंगनिष्ठातिखलो हि कंसः तदाह रेः कालगतिं विचार्य शौरिः प्रसन्नः पुनराह कंसं १९ श्रीवसु
देव उवाच नास्यास्तु ते देव भयं कदाचिद्यद्देववाक्यात्कथितं च तत्तु पुत्रान्ददामीति यतो भयं स्यात्स्मात्ते व्यथा दुस्याः प्रसव
प्रजातान् २० श्रीनारद उवाच कृत्वा स निश्चित्य वचो हि शौरेः कंसः प्रशंसन्स्वगृहं गतोभूत् शौरिस्तदा देवकराजपुत्र्या भया
वृतः स नरहमाजगाम २१ ॥ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे वसुदेवविवाहवर्णनं नाम नवमोध्यायः ९
श्रीनारद उवाच भीतः पलायते नार्यं यो हारः कंसनोदितः शुपुत्ते शासनसंयुक्ता रुरुधुः शौरिमंदिरं १ शौरिः कालेन देव।
क्यामष्टौ पुत्रानजीजनत् अनुवर्षं चाथ कन्यामेकां मायां सनातनीं २ कीर्तिमंतं सुतं त्वाद्यौ जातमानकदुंदुभिः नीत्वा कं
ससभामेत्य ददौ तस्मै परार्थवित् ३ सत्यवाक्यस्थितिं शौरिं दृष्ट्वा कंसो घृणीलभूत् दुःखं वै साधुर्न सहते सम्यक् सत्यसमानः।
हि ४ कंस उवाच एष वालो यातु गृहं मे न तस्मान्न हि मे भयं युवयोरष्टमं गर्भं हनिष्यामि न संशयः ५ श्रीनारद उवाच इत्यु।
क्तो वसुदेवस्तु सपुत्रो गृहमागतः सत्यं नाम न्यतमना कंवाक्यं तस्य दुरात्मनः ६ तदैव नारदागतेमां नत्वा पूज्योग्रसेनजः प
प्रच्छ देवाभिप्रायं ज्ञात्वो वेदं तन्निवोधमे ७ नंदाद्या वसवः सर्वे वृषभान्वादयः सुराः गोप्यो वेदऋचा याश्च संति भूमौ नृपेश्वर ८

गर्गं. वसुदेवादयोदेवामथुरायांवहूश्रयः देवक्याद्याःस्त्रियःसर्वादेवताःसंतिनिश्चयः ७ समवायश्चसंख्यानामहसांसर्वएवहि
गो. तेहंतः संख्ययापेवामंकानांवामनोगतिः ९ श्रीनारदउवाच इत्युक्त्वांतर्हितेतस्मिन्देवर्षौयमे कंसःकोपावृतःसद्योय
११ दूत्कंठंमनोदधे ११ वसुदेवंदेवकींचवधावनिगडैर्दृढैः ममर्द्दतेषिलापृष्टेदेवकीगर्भजंशिशुं १२ जातिस्मरोविष्णुभया।
ज्ञातेजातंजघानह इतिदुर्हविभावाच्चभूमौभूतेनृशंसया १३ उग्रसेनस्तदाक्रुद्धोयादवेंद्रोनृपेश्वरः वारयामासकंसाख्यं
वसुदेवसहायकृत् १४ कंसस्यदुरभिप्रायेदृष्ट्वोग्रस्यमहाभटाः उग्रसेनागारंदाचक्रुस्तेखड्गपाणयः १५ उग्रसेनानुगा
नुदृष्ट्वाकंसवीराःसमुत्थिताः तैःसार्द्धमभवद्युद्धंसभामंडपमध्यतः १६ द्वारदेशेपिवीराणांयुद्धंजातंपरस्परं खड्गप्रहा
रैस्तुतेजनानांनिधनंगतं १७ कंसोगृहीत्वाथगदांपितुःसेनांममर्द्दह कंसस्यगदयास्पृष्टाःकेचिच्छिन्नललाटकाः १८ भि
न्नपादाभिन्नमुखैःछिन्नांसाःछिन्नवाहवः अथोरुजाऊर्द्धगुल्फाःप्रणष्टाःपतिताहणात् १९ वमंतोरुधिरंवीरामूर्छिता म
निधनंगताः सभामंडपमारक्तंदृश्यतेस्तत्तजश्रवात् २० इत्थंमदोत्कटःकंसःसंनिपात्योद्भटान्रिपून् क्रोधात्प्रोराजरा
जेंद्रंजग्राहपितरंखलः २१ नृपासनात्संगृहीत्वावधापाशैश्चतंखलः तस्मिन्नैश्चनृपैःसार्द्धंकारागारेरुरोधह २२ मथु
राशूरसेनानांदेशानांसर्वसंपदां सिंहासनेचोपविश्यस्वयंराज्यंचकारह २३ पीडितःयादवाःसर्वेसंबंधमिषैस्त्वरं
चन्नदेशांतरंदेशान्विविशुःकालवेदिनः २४ देवक्याःसप्तमेगर्भेहर्षशोकविवर्द्धने व्रजंप्रणीतेरोहिण्यामनंतेयोगमा
यया २५ अहोगर्भःक्वविगतइत्यूचुर्माथुराजनाः अथव्रजेपंचदिनेषुभाद्रेस्वातीचषष्ठ्यांचसितेबुधेच उच्चैर्ग्रहैःपंचभिरा
वृतेचलग्नेतुलाख्येदिनमध्यदेशे २७ सुरेषुवर्षत्सुसुपुष्पवर्षंघनेषुमुंचत्सुचवारिविंदून् बभूवदेवोवसुदेवपत्न्यां।
विभासपन्नेंदरहस्वभासा २८ नंदोपिकुर्वन्नृपशिशुजातकर्मददौद्विजेभ्योनियुतंगवांच गोपान्समाहूयसुगायकानां
रावैर्महामंगलमातनोति २९ द्वैपायनोदेवलदेवरातवसिष्ठवाचस्पतिभिर्मयाच आगत्यतत्रैवसमस्थितोभूत्पादि २१

गर्ग॰ नंदकृतैः प्रसन्नः ३० श्रीनंदउवाच सुंदरो बालकः कोयं नरूपो यत्समः क्वचित् कथं पंचदिनाज्जातस्तन्मे ब्रूहि महामुने ३१
गो॰ श्रीव्यासउवाच अहोभाग्यं तते नंद शिशुः शेषः सनातनः देवक्यां वसुदेवस्य जातो ये मथुरापुरे ३१ कृष्णेच्छया तदुदरात्स्यणीतं
११ रोहिण्यां शुभं नंदराज त्वया दृष्टो दुर्लभो योगिनामपि ३२ तद्दर्शनार्थं प्राप्तोहं वेदव्यासो महामुनिः तस्मात्त्वं दर्शयास्माकं शि
शुरूपं परात्परं ३४ श्रीनारदउवाच अथ नंदः शिशुं शेषं दर्शयामास विस्मितः दृष्ट्वा शेषं स्वेस्थिते प्राद्नत्वा सत्यवतीसुतः ३५ श्री
व्यासउवाच देवादिदेव भगवन्कामपाल नमोस्तु ते ३६ नमोनंताय शेषाय साक्षाद्रामाय ते नमः धराधराय पूर्णाय स्वधाम्ने
सीरपाणये सहस्रशिरसे नित्यं नमः संकर्षणाय ते ३७ रेवतीरमण त्वं वै बलदेवोच्युताग्रजः हलायुधः प्रलंबघ्नः पाहि मां पु
रुषोत्तम ३८ बलाय बलभद्राय तालांकाय नमोनमः नीलांबराय गौराय रौहिणेयाय ते नमः ३९ धेनुकारिर्मुष्टिकारिः कुंभां
डारिस्त्वमेव हि रुक्म्यारिः कूपकर्णारिः कूटारिर्बल्वलांतकः ४० कालिंदीभेदनोसि त्वं हस्तिनापुरकर्षकः द्विविदारिर्यादवेंद्रो
व्रजमंडलमंडनः ४१ कंसभ्रातृप्रहंतासि तीर्थयात्राकरः प्रभुः दुर्योधनगुरुः साक्षात्पाहि पाहि प्रभो जगत् ४२ जयजयाच्यु
तदेव परात्पर स्वयमनंत दिगंतगतश्रुत सुरमुनींद्रफणींद्रवराय ते मुसलिने हलिने बलिने नमः ४३ य इह पठेत्सततं स्तवनं तु यः स
तु हरेः परमं पदमाव्रजेत् जगति सर्वबलं त्वरिमर्दनं भवति तस्य जयः स्वधनं धनं ४४ श्रीनारदउवाच बलं परिक्रम्य शतं प्र
णम्य ते द्वैपायनो देवपराशरात्मजः विशालबुद्धिर्मुनिबादरायणः सरस्वतीं सत्यवतीसुतो ययौ ४५ इति श्रीमद्गर्गाचार्यसं
हितायां गोलोकखंडे श्रीनारदबहुलाश्वसंवादे बलभद्रजन्मवर्णनं नाम दशमोध्यायः १० ॥ श्रीनारदउवाच परिपूर्णत
मः साक्षाच्छ्रीकृष्णो भगवान्स्वयम् विवेश वसुदेवस्य मनः पूर्वपरात्परः १ सूर्येन्दुवह्निसंकाशो वसुदेवो महामनाः बभू
वात्यंतमहसा साक्षाद्यज्ञ इवापरः २ देवक्यामागते कृष्णे सर्वेषामभयंकरे राजते न सा गेहे च ने सौदामिनी यथा ३ तेजोव
तीं च तां वीक्ष्य कंसः शत्रुभयातुरः प्राप्तो यं प्राणहर्ता मे पूर्वं मे यान चेदृशी ४ जातमात्रं हनिष्यामीत्युक्त्वास्ते भयविह्वलः ५ २२

नत्वा प्रणम्य तं शेषं परिक्रम्य कृतांजलिः दीनो भयातुरः शाह्वदी वेपथुः प्रकंपितः २१ कालिय उवाच हे भूमिभर्तर्भुवनेश भूमन्
भारभृत्त्वं निजभूरिलीला सां पाहि पाहि प्रभविष्णुपूर्णः परात्परस्त्वं पुरुषः पुराणः २२ नारद उवाच दीनं भयातुरं दृष्ट्वा कालियं।
श्रीफणीश्वरः वाचं मधुरया प्रीणन्नाह देवो जनार्दनः २३ शेष उवाच हे कालिय महाबुद्धे शृणु मे परमं वचः कुत्रापि न स्थितेर।
त्रा भविष्यति न संशयः २४ आसीत्पुरा मुनिः सिद्धः सौभरिर्नाम नामतः वृंदारण्ये तपस्तेपे वर्षाणामयुतं जले २५ मीनराजवि
हारं यो वीक्ष्य गेहस्पृहोऽभवत् स उवाह महाबुद्धिर्मांधातुस्तनुजार्थशत् २६ तस्मै ददौ हरिः साक्षात्स्वारूप्यं भागवतीं श्रियं वीक्ष्य तां।
नृपमांधाता विस्मितोऽभूद्गतस्मयः २७ यमुनांतर्जले दीर्घं सौभरेस्तपतस्तपः पश्यतस्तस्य गरुडो मीनराजं जघान ह २८ मीना
न्दुःखितान्दृष्ट्वा दुःखहा दीनवत्सलः तस्मै शापं ददौ क्रुद्धः सौभरिर्मुनिसत्तमः २९ सौभरिरुवाच मीनानद्यतनादत्र यद्यत्सि
त्वं बलाद्धि गराट् तदैव प्राणनाशस्ते भूयान्मे शापतस्त्वरं ३० शेष उवाच न तद्दिनात्तत्र याति गरुडः शापविह्वलः तस्मात्कालि-
य गच्छाशु वृंदारण्ये हरेर्वने ३१ कालिंद्यां च निजं वासं कुरु मद्वाक्यनोदितः निर्भयो निर्भयं सा तावन्न भविष्यति कर्हिचित् ३२ श्री
नारद उवाच इत्युक्तः कालियो भीमः सकलत्रः सपुत्रकः कालिंद्यां वासमकरोज्जनु श्रीकृष्णेन विवासितः ३३ * इति श्रीमद्गर्गाचा
र्यसंहितायां वृंदावनखंडे कालियोपाख्याने एकादशोऽध्यायः ११ * श्रीनारद उवाच इदं मया ते कथितं कालियस्यापि मर्दनं
श्रीकृष्णस्य चरित्रं पुण्यं किं भूयः श्रोतुमिच्छसि १ श्रीबहुलाश्व उवाच श्रीकृष्णस्य कथां श्रुत्वा भक्तस्तृप्तिं न याति हि यथामरः सु।
धां पीत्वा तथालिः पद्मकर्णिकां २ रासं कृत्वा हरे जाते शिशुरूपे महात्मनि भांडीरे देववाग्माह श्रीराधां खिन्नमानसां ३ शोकं।
मा कुरु कल्याणि वृंदारण्ये मनोहरे मनोरथस्ते भविता श्रीकृष्णेन महात्मना ४ इत्थं देवगिरा शोको मनोरथमहात्मनः कथं।
बभूव भगवन्वृंदारण्ये मनोहरे ५ कथं श्रीराधया सार्द्धं रासक्रीडां मनोहरां चकार वृंदकारण्ये परिपूर्णतमः स्वयं ६ नार-
द उवाच साधु पृष्टं त्वया राजन्भगवच्चरितं शुभं गुप्तं वदामि देवैश्च लीलाख्यानं मनोहरं ७ एकदा मुख्यसख्यौ हे विशाखा

1562

ग.सं. ललिते शुभे वृषभानुवरेहं प्राप्यतां जगदन्तरे ८ सत्योऽभवत्तः यं चिन्तयसि राधे त्वं पद्मरूपं वदसि स्वतः सोऽपि नित्यं समायाति शुभ
वृं भानुपुरे सखे ९ प्रेतनीयत्वया राधे दर्शनीयो नितंदरः यस्मिन्माधवी निशीथिन्यां गोचारणाविनिर्गतः १० श्रीराधोवाच लिखित्वा
१० तस्य चित्रं हि दर्शय शुभमनोहरं नहि तन्ने दत्तां पश्चात्करिष्यामि न संशयः ११ नारद उवाच प्रथमसख्यो विलिखितं चित्रं नन्दशिशोः शुभं
नवयौवनमाधुर्यं राधायै दत्तत्वरं १२ तं दृष्ट्वा हर्षिता राधा कृष्णदर्शनलालसा चित्रं करे प्रपश्यन्ती सुखपानंदसंकुला १३ ददा
शी कृष्णसंभुवने शयाने स्वन शुभं पीतपटं दधाने भांडीरदेशे यमुनातसमीपे तन्तं तमाराद्वृषभानुपुत्री १४ तत्रैव राधा शयनात्समु न
त्थिता परस्य कृष्णस्य वियोगविह्वला संचिन्तयन्ती कमनीयरूपिणं मेने त्रिलोकं तृणवद्धि देहतः १५ तन्नीव्रजन्ते स्वव्रजेश्वरं त
संकोचवीथ्यां वृषभानुपत्तने गतातमेत्याशु सखीप्रदर्शितं दृष्ट्वा प्रमूर्छां समवाप सुंदरी १६ कृष्णोऽपि दृष्ट्वा वृषभानुनंदिनीं स्व
रूपकौशल्ययुतां गुणाश्रयां कुर्वन्मनोरंजनमतीव माधवो लीलातनुः स्वप्रययौ स्वमंदिरं १७ एवं ततः कृष्णवियोगविह्वलां
प्रभूतकामज्वरखिन्नमानसां संवीक्ष्य राधां वृषभानुनंदिनीं सुवाचवाचं ललिता सखीवरा १८ ललितोवाच कथं त्वं विह्वला राधे मू
न र्छितासि व्यथागता यदीच्छसि हरिं सुभ्रु तस्मिन्स्नेहं दृढं कुरु १९ लोकस्यापि सुखं सर्वमपि कृष्णोऽस्ति संप्रतं दुःखाग्नि हसदह
निकुंभकाराग्निवत्शुभे २० श्रीनारद उवाच ललितायाश्च ललितं वचः श्रुत्वा व्रजेश्वरी नेत्रे उन्मील्य ललितां प्राह गद्गदया गिरा २१
राधोवाच व्रजालंकारचरणौ न प्राप्नोमि यदि मे सखि कदाचिद्विग्रहं तर्हि न दहे धारयाम्यहं २२ श्रीनारद उवाच इति श्रुत्वा वचः
तस्याः ललिता भयविह्वला श्रीकृष्णपार्श्वं प्रययौ कृष्णातीरे मनोहरे २३ मालतीलाजसंयुक्ते मधुपध्वनिसंकुले कदंबमू
ले रहसि प्राह वै का किं नहरिं २४ ललितोवाच यस्मिन्दिने च ते रूपं राधया दृष्टमद्भुतं तद्दिनात्स्तंभतां प्राप्ता प्रतिक्षेत्र न वक्ति
किं २५ यथा कारस्त्वचिरिव स्रजं भजे रजो यथा सुगंधकटवयस्यां मंदिरं निजे नेत्रवनं २६ पुष्पवाणांबरविंबेविषकं भ्रमवे हिभ्रोः
न स्मेसंदर्शनं देहि राधायै दुःखनाशनं २७ तेस्याऽलिगणाः किं विदितं न भूतले सृजन्तलं यासि हरात्मयोजगत् यदा समानोसिज १०
ले

1563

नेष्ठ सर्वं न स्वत्यापि भक्त्यान्मजसे परेश्वरः २८ श्रीनारद उवाच इति श्रुत्वा हरेः साक्षाल्ललितं ललिता वचः उवाच भगवान्देवो मेघ
गंभीरया गिरा २९ श्रीभगवानुवाच सर्वं हि भावं च परस्यां सदा न त्येकतो भामिनि जायते ततः प्रेमैव कर्तव्यमतो मयि त्वतः प्रे
म्णा समानं भुवि नास्ति किंचित् ३० यथा हि भांडीरवने मनोरथो वभूव तस्या हि तथा भविष्यति अहैतुकं प्रेम च भक्तिराश्रितं तद्वा
पि संतः किल निर्गुणं विदुः ३१ ये राधिकायामपि केशवे हरौ कुर्वंति भेदं कुधियो नरा भुवि ते कालसूत्रं प्रपतंति दुःखिता रंभोरु
यावत्किल चंद्रभास्करौ ३२ श्रीनारद उवाच इत्यं श्रुत्वा वचः कृष्णं नत्वा तं ललिता सखी राधां समेत्याह हसित्प्रहसितानना ३३
ललितोवाच त्वमिच्छसि यथा कृष्णं न यथा तं मधुसूदनः युवयोर्भेदराहित्यं तेजसा लोकं द्विपाजनैः ३४ तथापि देवि कृष्णस्यायकर्मभिः
कारणं कुरु येन ते वांछितं भूयाद्धृत्वा चरणसेवितं ३५ श्रीनारद उवाच इति श्रुत्वा सखीवाक्यं राधा रासेश्वरी नृप चंद्राननां प्र
हसखीं सर्वधर्मविदां वर ३६ श्रीराधोवाच श्रीकृष्णस्य प्रसन्नार्थं परं सौभाग्यवर्द्धनं महापुण्यं वांछितदं न जाने व्रदकं सखि त् १०
वया भद्रे सर्वशास्त्रं गर्गाचार्यमुखाच्छ्रुतं तस्माद्व्रतं पूजनं वा ब्रूहि महत्यं महामते ३७ * इति श्रीगर्गाचार्यसंहितायां वृंदावनखं
डे श्रीराधाकृष्णप्रेमप्रश्नवर्णनं नाम द्वादशोऽध्यायः १२ * श्रीनारद उवाच राधावाक्यं ततः श्रुत्वा राजन्सर्वं सखीवरा चंद्राननाप्र
सुवाच सा विचार्य त्वरां हृदि १ चंद्राननोवाच परं सौभाग्यदं राधे महापुण्यं वरप्रदं श्रीकृष्णस्यापि लब्ध्यर्थं तुलसीसेवनं मतं २
दृष्टा स्पृष्टा यथा ध्याता कीर्तिता नामिता स्तुता रोपिता सिंचिता नित्यं पूजिता तुलसीदलैः ३ नवधा तुलसीभक्तिं ये कुर्वंति दिने दि
ने युगकोटिसहस्राणि ते यांति सुकृतं शुभे ४ यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैः शुभैः रोपिता तुलसी मर्त्यैर्वर्द्धते वसुधातले ५
तेषां वंशोत्थये जाता ये भविष्यंति ये गताः आकल्पयुगसाहस्रं तेषां वासो हरेर्गृहे ६ यत्फलं सर्वपत्रेषु सर्वपुष्पेषु राधिके तुलसी
दलेन चैकेन सर्वदा प्राप्यते ततः ७ तुलसीप्रभवैः पत्रैर्यो नरः पूजयेद्धरिं लिप्यते न स पापेन पद्मपत्रमिवांभसा ८ सुवर्णभार
शतकं रजतस्य चतुर्गुणं तत्फलं समवाप्नोति तुलसीवनपालनात् ९ तुलसीकाननं राधे गृहे यस्यावतिष्ठति तद्गृहं तीर्थरू।

गर्ग॰ पंक्तिनायोतिपमर्किकरः सर्वपापहरं पुण्यं काननं तुलसीवने रोपयंति नरश्रेष्ठास्ते न पश्यंति भास्करिं ११ रोपनात्पालनात्से
वृं॰ कात्दर्शनात्स्पर्शनान्नृणां तुलसी दहति पापं वाङ्मनःकायसंचितं १२ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा वासुदेवादयो दे
११ वावसंति तुलसीदले १३ तुलसीमंजरीयुक्तो यस्तु प्राणान्विमुंचति यमोपि नेक्षितुं शक्तो युक्तं पापशतैरपि १४ तुलसीकाष्ठजं
यस्तु चंदनं धारयेन्नरः तद्देहं न स्पृशेत्पापं क्रियमाणमपीह तः १५ तुलसीविपिनच्छाया यत्र यत्र भवेच्छुभे तत्र श्राद्धं प्रकर्तव्यं
पितॄणां दत्तमक्षयं १६ तुलस्याः सर्वमाहात्म्यमपि देवस्तु तत्त्वतः न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः १७ श्रीकृष्णचंद्र
चरणौ तुलसीं वंदते पुंसां यो ददाति शुभान्स्त्रीवा यथोक्तं फलमाप्नुयात् १८ तुलसीसेवनं नित्यं कृतं गोपकन्यके श्रीकृष्णेव
शपतानि येन वा सर्वदेवदि १९ नारद उवाच इत्थं चेद्वानन्तात्वा [illegible] श्रुत्वा गोपेश्वरी नृप तुलसीसेवनं साक्षाद्धारंभे हरितोषणं २०
केतकीवनमध्ये च प्रातस्तलतले उक्तं हेमवर्चिद्धितिपद्मरागतटं शुभे २१ हरिद्वीरकमुक्तानां प्राकारेण महोल्लसत् स
वंतस्तोलकायुक्तं वितानमणिसमंडपं २२ हेमध्वजसमायुक्तं मुक्तानां तोरणराजिते हैमैर्वितानैः परितो वैजयंतमिवस्फुरत् २३
एतादृशं श्रीतुलसीमंदिरं समनोहरं तन्मध्ये तुलसीस्थानं हरितपल्लवशोभितं २४ अभिजिन्नामनक्षत्रे तत्सेवां सा चकार ह
समारब्धेन गर्गेण दृष्टेन विधिना सती २५ श्रीकृष्णतोषणार्थाय भक्त्या परमया सती इत्थं पूर्णां समारभ्य चैत्रपूर्णां विधिकृते २६
कृत्वान्यसिंचद्रथेन तथा चैत्ररसेन वै द्वात्रिंशत्सहस्रेणापि सिंच यावद्दृमिहया २७ पंचामृतेन तुलसीं मासे मासे पृथक् पृथक्
उद्यापने समारंभे वैशाखे प्रतिपद्दिने २८ गर्गदृष्टेन विधिना वृषभानसुता नृप षट्पंचाशत्सहस्राणि भोगैर्वी [illegible] णानां द्विलक्षकं २९
संतर्प्य वस्त्रभूषाद्यैर्दक्षिणां राधिका ददौ दिव्यानां स्थूलमुक्तानां लक्षभारं विदेहराट् ३० कोटिभारं सुवर्णानां गर्गाचार्याय सा द
दौ पात्रभारं सुवर्णानां मुक्तानां च तथैव च ३१ भक्त्या परमया राधा ब्राह्मणेभ्यो ब्राह्मणो ददौ देवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः ३ २
तन्मंदिरोपरि सुराः पुष्पवर्षां प्रचक्रिरे तदाविरासीत्तुलसी हरिप्रिया सुवर्णपद्मोपरि शोभितासना चतुर्भुजा पद्मपलाशवी। ११

हत्नाश्यामामास्फुरद्धेमकिरीटकुंडलां २३ पीनांवराच्छादितसर्पवेणींस्रजंदधानांनववैजयंतीं वेणान्स्वगुर्वीयंवांगवल्लीवृंदावन
धांपरिरभ्यवाहुभिः २४ श्रीसूतउवाच श्रुदेवसत्तोसिकलावतीसतेत्तद्भक्तिभावेनजितात्मनिरंतरं कृतेवलोकव्यवहारसंग्रहाव
याभूतेभास्मिन्निसर्वतोमुखं २५ मनोरथस्तेसफलोत्रभूयाद्धृदीदियेप्सितमनोभिरथ्यतः सदाशुकूलत्वमलंपतेःपरंसोभाग्यमेवं
भुविकीर्तिनायकः २६ श्रीनारदउवाच एवंवदंतींतुलसींहरिप्रियांतत्ताथराधावृषभानुनंदिनी प्रभाद्दगोविंदपराविंदयोर्भक्ति
भवेन्मेविदितात्मलेदैनकी २७ तथास्तवोक्तातुलसीहरिप्रियायांत्रतदंये मैथिलराजसत्तम तदैवराधावृषभानुनंदिनी प्रसन्नवित्ता
स्वशरेवभूवह २८ श्रीराधिकाख्यानमिदंविचित्रंशृणोतियोभक्तिपरः पृथिव्यां ऐश्वर्यभावेमनसामुपेत्यराजेत्वतोयातिनरःकृता।
र्थतां २९ ॥ इतिश्रीमद्गर्गसंहितायांवृंदावनखंडेतुलसीपूजनंनामषोडशोध्यायः १६ ॥ बहुलाश्वउवाच राधाकृतस्सवरितेनशृ
एवंतोमेमनोमुने नतृप्तिंयातिश्यारःपंकजेभ्रमरोयथा १ रासेश्वर्याःकृष्णपत्न्यास्तुलसीसेवनेकृते यद्बभूवमनोवस्ततन्मेब्रूहित
पोधन २ नारदउवाच राधिकायाश्चविज्ञायतुलसीसेवनेतपः प्रीतिंपरीत्वन्वीक्ष्णसोवृषभानुपुरेययौ ३ मुहूर्तंगोपिकारूपेंव।
लंकारनूपुरं किंकिणीकंटकाशाहूमंगुलीयकभूषितं ४ रत्नकंकणकेयूरश्रुङ्गाहारविराजितं बालार्कताटंकलसत्कवरी
पाशकौसलं ५ नासामौक्तिकदिव्याभंपद्मामकुंतलसन्निभं धृत्वासौवृषभानोस्तुमंदिरंसहदर्शह ६ प्राकारपरिखायुक्तंचतः।
द्वारसमन्वितं करींद्रैःकज्जलाकारैर्हारिभिःसुमनोहरं ७ वायुवेगैर्मनोवेगैश्चित्रवर्णैस्तुरंगमैः हारचामरसंयुक्तंधोलसन्मंडपा
जिरं ८ गवांगणैःसवत्सैश्चवृषैर्धर्मधुरंधरैः गोपालायत्रगायंतेवंशीवेत्रधरान्नृप ९ वृषभानुवरस्यैवनपस्पमंदिरकोशलं मा
यायुवतिवेषोसौनंतोत्यंतःपुरंययौ १० यत्रकोटिरविस्फूर्जत्कपाटस्तंभपंक्तयः रत्नाजिरेषुशोभंतेललनारत्नसंयुताः ११ वीणा
तालमृदंगादीन्वादयंतोमनोहरान् पुष्पवृष्टिसमायुक्तागायंतेराधिकागुणान् १२ तस्मिन्नंतःपुरेदिव्येभ्राजद्धोपवनंमहत् दाडिमैः
कुंदमंदारनिवहंतरुमाहृतं १३ केतकीमालतीवृंदैर्माधवीभिर्विराजितं तत्रराधानिकुंजोस्तिकल्पद्रुमसुगंधिमत् १४ पतंति

गर्गा. यत्र भ्रमरा मधुमत्ता न्वयेश्वर गंधाक्तः शीतलो वायुर्मंदगामी वहत्यलं १५ मदमत्तदलपद्मानां रंजो विक्षेपयन्मुहुः पुंस्कोकिलः को
वृं. किलाश्च मयूराः सारसाः शुकाः १६ कूजंतो मधुरं यत्र निकुंजशिखरेषु च पुष्पशय्या मदस्थानि जलकल्पाः मदस्पृशः १७ प्रो
१२ ल्लसंति स्फुरद्वारा यत्रैवै मे ग्रमंदिरे वालार्ककुंडलधरा चित्रवस्त्रविराजिता १८ वर्तते कोटिशो यत्र सख्यस्तत्कर्मकौशले तन्मध्ये
राधिका राज्ञी श्रीमंती सुंदिराजिरे १९ काश्मीरपंकसंयुक्तैः सूक्ष्मवस्त्रविराजिता शिरीषपुष्पदलतिनदलेरागल्फाशरके २० माल
तीमकरंदानां ब्रह्मद्विविंदुभिर्वृतं कोटिचंद्रप्रतीकाशा तन्वी कोमलविग्रहा २१ शनैः शनैः पादपद्मं धारयंत्यतिकोमले समान
तां तं मणिमंदिराजिरे दृष्टशी राधा वृषभानुनंदिनी यत्रै जसा तल्ललनाहृतविषोज्जाता सत्वरं चेद्रुमसेवतारकाः २२ विज्ञापयतद्योर
वसुन्नमं मदङ्गन्याय दोर्भ्यां परिरभ्य राधिका दिव्यासने स्थाप्य सलोकरीमा जलादिकं चार्हणमाप्तुरेभे २३ श्रीनारदोवाच सागतंते
रि सखि सुभे नाम येयं वदाशुभे भूभारं परमेश्वरात्प्रभवत्यागतया स्वतः २४ तत्समानं दिव्यरूपं रश्यते न दिभूतले यत्रैव वर्तसे स
क्ष यत्रं नयन्यमेव तत् २५ वदस्वैवि सविस्तारं हे त्वमा रामनस्य च ममयोग्यं वृयत्कार्यं वक्ष्यंततयावत्व २६ कदा ते गमसखी।
मास्यावचसा सुस्मिते तेन वै गत्याकृतिः श्रीपतिवद्रूपते सांप्रतं मया २७ नित्यं शुभे मे मिलनार्थमावजनो चेत्स्व संकेतमले चिवे
हि येनैव संयोगविधिना भवेद्धि विधिर्भवन्या मम सदा विधेयः २८ श्रुयं त्वदात्मातिपरं प्रियो मम तदाकृतिः श्रीव्रजराजनंदनः ये
नैव मे देवि हृतं तु चेतस्त्वानने देव वघूर्दयामिनि २९ श्रीनारद उवाच एवं राधा वचः श्रुत्वा मायाशुवति वेषधृक् उवाच भग
वान्कृष्णो राधां कमललोचनां ३० श्रीभगवानुवाच रंभोरु नंदनगरे नंदगेहस्य चोत्तरे गोकुले वसति श्रीमल्लिनाम्नाहं गोपदे
वता ३१ तद्रूपगुणमाधुर्यं श्रुत्वा मे ललिता मुखात् तस्त्वंचंचलापांगि त्वद्गृहे हं समागता ३२ श्रीमल्लवंगतिलकास्फट
मेदिनीनां गुंजानिकुंजमधुपध्वनिकेजपुंजं दृष्टं श्रुतं तेन च वनं नवकंजनेत्रे दिव्यं पुरंदरपुरेपि न यत्समानं ३३ नारद उवाच
एवं तयोर्मिलनं तत्र वभूव मिथिलेश्वर कलाकौशल्यसंपन्नां राधां कमललोचनां गिरा मधुरया राजन्नृशाहं दं गोपदेवता ३४ १२

1566

गर्गा॰ द्विजेभ्यः ९ पृथुके विनिधाय निजमात्मजमाशु गोपी संभृत्य मंगलदिने प्रतिगोपिकाभिः नैवाशृणोत्स्वरुदितं स्वसुतस्य।
गो॰ शब्दं गोपीषु मंगलगृहेषु गतागतेषु १० तत्रैवकं सबलनोदितउत्कचाख्यो दैत्यः प्रभंजनतनुः शकटं प्रपन्नः बालस्य
३१ मूर्द्धि यदि पातयितं प्रवृत्तः कृष्णोपि तं किल ततनाडुरः पदेन ११ चूर्णीगते प्रशकटे पतिते च दैत्यस्त्यक्त्वा प्रभंजनतनुं
विमलो बभूव नत्वा हरिं शतहयेन रथेन युक्तो गोलोकधाम निजलोकपथो जगाम १२ नंदादयो व्रजजना व्रजगोपि।
काश्च सर्वे समेत्य प्रणयन्त्यश्रुकाःस्तदाह एष स्वयं च पतितः शकटः कथं हि जानीमहे व्रजजनाः सगताश्च पूर्वं १३ बा
लाऊचुः पृथुकस्योपरि तिपत्यादै रुदहन्तु यथार्थमेवहि ततो गोपादेशकटे तेने दृशकटं तनु १४ ग्रहांनचक्रवोलेके गोपागो
प्यश्च विस्मिताः दैमासिकः क्व बालोयं क्व मतं भारभृत्तनः १५ बालमंके समगृहीत्वा यशोदा गृहसंकिता कारयामास वि ४ धि
धवद्विप्रैः स्तर्पितैः १६ बहुलाश्व उवाच कोयं पूर्वं तकुशलीदैत्य उत्कचनामभाक् गृहीत्वा स्वपदस्पर्शात्कृतो मोक्षं महा
मुने १७ नारद उवाच हिरण्याक्षसुतो दैत्यः उत्कचो नाम मैथिल लोमशस्याश्रमे गच्छन्नृक्षान् चूर्णीचकार ह १८ तं दृ
ष्ट्वा स्थूलदेहा च प्रशुक्ला वा विमहावल शशापरोषयुग्विप्रो विदेहो भव दुर्मते १९ सर्पकंचुकवद्देहपतन्मे विषाकृतः
स पपात च रणौ पादेः पतिता शुद्ध दैत्यराट् २० उत्कच उवाच हे मुने हे कृपासिंधो कृपां कुरु ममोपरि ते प्रभावं न जानामि दे
हं मे देहि प्रभो २१ नारद उवाच तदा प्रसन्नः स मुनिर्दृष्ट्वा तं प्रान्तवियेः सत्तो रो धोपि वरदो वरो भोत्ताथदः किमु २२ लोम
श उवाच वानदेह स्मृतेनि भूयात्तिनेवात सायांतरे वैवस्वते तरे मुक्ति भविता च पदाद्धरेः २३ नारद उवाच तस्मादुत्कचदैत्यस्त
श्रक्ता लोमशा तेजसा सद्यो नमोक्तये नूनं समर्था व शापयोः २४ उत्संगे क्रीडितेबालं ललालयंत्येकदान्नप गिरिभारं न सेहे
न बोढुं श्री नंदगेहिनी २५ ग्रहो गिरि समोवालः कथं स्यादिति विस्मिता भूमौ निधाय तं सद्यो नेदं कस्मै जगाद ह २६ कंसप्र।
णोदितो दैत्यस्तृणावर्तो महावलः जहार वालं क्रीडंतं वात्या वर्तेन संदरे २७ रजोपकारभूते च घोरशब्दं च गोकुले रजस्वला· ३१

गर्ग. निचखानुषिवभूर्व्यघटिकाद्वयं २८ ततोयशोदानापश्यन्त्वंतंमंदिराजिरे मोहितारुदतीघोरान्पश्यंतीगृहगोपवान् २९
गो. अहरेहेचयदापुत्रेपतितानुविमूर्छिता उत्थेरुरोदकरुणंमृतवत्सायथागौः ३० रुरुदुश्चततागोप्यःप्रेमस्नेहसमाकु-
३२ लाः अश्रुमुख्योनंदसूनुंपश्यंत्यस्ताइतस्ततः ३१ तृणावर्तोनभःप्राप्तःऊर्ध्वेवलक्षयोजनं स्कंधेधृत्वाहरिंवहल्लमन्यमानः
प्रपीडितः ३२ अथहरिःसंपातयितुंदैत्यस्तत्रसमाश्रयतः बलेजगाद्दनस्तापिपपिविमुखोतिनमःस्वयं ३३ मुंचमुंचेतिगदितेदैत्येकृ-
ष्णोद्भुतोर्भकः गलग्राहेणमहतागृहीत्वादैत्यंचकारह ३४ तत्पौतिःसीवनरपापमेलीनोभूद्दामिनीयथा दैत्यौवशान्निपति-
तःशिशुनासहमैथिलि ३५ विशीर्णावयवस्यापिपतितस्यस्वनेनवै विनेदुश्चदिशःसर्वाःकंपितंभूमिमंडलं ३६ तत्प्रा-
प्यसंस्थितंशिशुंतूष्णींरुदंत्योगोपिकास्ततः ददृशुर्गतपत्नीवानीत्वामातुर्ददुर्जेशं ३७ गोप्यऊचुः नयोन्योस्तियशोदेत्वंकन्या
लालयितंमनाक् तद्गुणनेकविदुष्टाकुद्दामिकथितेनवै ३८ प्रासंधकारेस्वारोहक्तोपिवालेजहासिहि तथानिधृ-
णायाभूमौवक्रवातेमहाभये ३९ यशोदोवाच नजानामिकथंवालेभारोभूतोगिरींद्रवत् तस्मात्मयाकृतोभूमौधृतोवालोम-
हाभये ४० गोप्यऊचुः मामन्यथावदकल्याणिदेवयशोदेगतेव्यथे अयंतुस्यपक्षोवालोमथुःकृतसमतूलवत् ४१ नारदउवाच
तदागोप्योथगोपाश्चनंदाद्याश्चागतोशिशौ अतीवमोदंसंप्रापुर्ववंदुःकुशलेजनैः ४२ यशोदावालकंनीत्वापाययित्वास्तनं।
गुद्धःअचीर्यायोरसिवस्त्रेणरोहिणीप्राहमोहिताः ४३ यशोदोवाच एकोदेवेनदत्तोयंतपुत्रोवहवद्गमे तस्यापिवहवोरिष्टा
आगच्छंतिक्षणेनवै ४४ अयपुत्रस्यसुखोत्सवोमविष्यःकिमतःपरं किंकरोमिकगच्छामिकुत्रवासोभवेदतः ४५ धनंदे-
होरहःसौधोरत्नानिविविधानिच सर्वंपानस्यवश्यंमेभूयात्मेकुशलीशिशुः ४६ हरेरंचीदानमिष्टंपूर्वंदेवालयंशतं क-
रिष्यामितदावालारिष्टेभ्योविजयीयदा ४७ एकवालेनमेसौख्यंमंयपशिहिविप्रभुः वालंनीत्वागमिष्यामिदेशेरोहिणीनि-
भये ४८ नारदउवाच तदेवविशाविद्वांसश्चागतानंदमंदिरं यशोदयाचनंदेनपूजितान्नासनस्थिताः ४९ ब्राह्मणाऊचुः ३२

1569

गर्ग॰ माशोकं कृतेनेदं दृष्टयशोदे व्रजेश्वरि करिष्यामः शिशोरस्य चिरजीवी भवेदयं ५० नारद उवाच इत्युक्त्वा द्विजमुख्यास्ते
गो॰ कुशाग्रैर्नवपल्लवैः पवित्रकलशैस्तोयैर्ऋग्यजुःसामजैः स्तवैः ५१ परैः स्वस्त्ययनैर्यज्ञं कारयित्वा विधानतः ग्रहान् संपूज्य
३३ विधिवद्दत्त्वा वित्तं विदधिरे शिशोः ५२ ब्राह्मणा ऊचुः दामोदरः पातु पदौ जानुनी विष्टरश्रवाः ऊरू पातु हरिर्नाभिं परिपूर्णत
मः स्वयं ५३ कटिं राधापतिः पातु पीतवासास्तवोदरं हृदयं पद्मनाभश्च भुजौ गोवर्द्धनोद्धरः ५४ मुखं च मथुरानाथो द्वारा
केशः शिरोऽवतु पृष्ठे पातु स्वरध्वंसी सर्वतो भगवान् स्वयं ५५ श्लोकत्रयमिदं स्तोत्रं यः पठेन्मानवः सदा महासौख्यं भवेन्नि
त्यं न भयं विद्यते क्वचित् ५६ नारद उवाच नंदस्तेभ्यो गवां लक्षं स्वर्णं दशलक्षकं सहस्रं नवरत्नानां वस्त्रलक्षं ददौ पर ५३
गते द्विजमुख्येषु नंदगोपान्प्रियस्ववत् भोजयामास संपूज्य वस्त्रैर्भूषैर्मनोहरैः ५७ बहुलाश्व उवाच तृणावर्तः पूर्वकाले
कोऽयं सुकृतकृत्परः परिपूर्णतमे साक्षाच्छ्रीकृष्णे लीनतां गतः ५८ पांडुदेशोद्भवो राजा सहस्राक्षः प्रतापवान् हरिभक्तो धर्म
निष्ठो यज्ञकृद्दानकृत्परः ५९ रेवातटे महादिव्ये लतावेत्रसमाकुले नारीणां च सहस्रेण रमयन्विचचार ह ६० दुर्वाससं मु
निं साक्षादागतं न ननाम ह तदा मुनिर्ददौ शापं राक्षसो भव दुर्मते ६१ पुनस्तच्चरणोः पतितो नृपे शापाद्द्वारे मुनिः श्रीकृष्णविग्र
हस्पर्शान्मुक्तिस्ते भविता नृप ६२ नारद उवाच सोपि दुर्वाससः शापात्तृणावर्तो भवद्भुवि श्रीकृष्णविग्रहस्पर्शात्परं मोक्षम
वाप ह ६३ ॥ इति श्रीमद्गर्गसंहितायां गोलोकखंडे शकटासुरतृणावर्तमोक्षो नाम चतुर्दशोऽध्यायः १४ ॥ नारद
उवाच प्रेंखे हरिं कनकरत्नमये शयानं श्यामं शिशुं जनमनोहरमंदहासं दृष्ट्वा निधाय मिसिविंडयदेयशोदा स्वांके च कार
धृतकंजलपद्मनेत्रे १ पादं पिबंतमतिचंचलमंगुलं तांगं वक्रैर्विनीलवनकोमलकेशबंधैः श्रीयंत्रकेशरनखस्फुरदर्द्ध
चंद्रं तलाललयं स्तनितिचूर्णमुदमाय गोपी २ बालस्य पीतपयसो नृपजृंभतः सा तत्र वाङ्मुखं च वदने सकलं विराजं मात्रा सूर्यो
दियमुखैः प्रयुतं च सर्वं दृष्ट्वा परं भयमवाप निमीलिताक्षी ३ राजन्यस्य परिपूर्णतमस्य साक्षात्कस्यविस्मरविलंकप ३३

ग॰सं॰ ष्टेन मोही नष्टस्त्री पुनरभून्महत्सतेन कृष्णार्तौ किं वर्णयामि सत्तपो वद नंदपत्न्याः ४ बहुलाश्व उवाच नंदो यशोदया सार्द्धं।
गो॰ किं चकार तपो महत् येन श्रीकृष्णचंद्रोपि पुत्रीभूतो बभूव ह ५ नारद उवाच अष्टानां वै वसूनां च द्रोणो मुख्यो धरापतिः अन
३४ पत्यो विष्णुभक्तो देवराज्यं चकार ह एकदा पुत्रकामोसौ च ब्रह्मणा नोदितोनघ मंदराद्रिं गतस्तत्र तथा धरया भार्यया सह ६ वल्मीका
न्निर्गतो द्रोणो धरया भार्यया सह नत्वा विधिं च संपूज्य हर्षितः प्राह तं प्रभुं ९ द्रोण उवाच परिपूर्णतमे कृष्णे पुत्रीभूते जनार्द
ने भक्तिः स्यादावयोः स्फीतां वदंति प्रेमलक्षणां १० ययांजसा तरंतीह दुस्तरं भवसागरं नान्यं वरं वांछितं स्यादावयोस्तपतोर्वि
धे ११ ब्रह्मोवाच युवाभ्यां याचितं यन्मे दुर्घटं दुर्लभं वरं तथापि भूयात्सफलं युवयोरन्यजन्मनि १३ नारद उवाच द्रोणो नंदो
भवद्भूमौ यशोदा साथ सा स्मृता कृष्णो ब्रह्मवचः कर्तुं प्राप्तो घोषे पितुः पुरात् १४ सुधारसात्परं मिष्टं श्रीकृष्णचरितं शुभं गंधमा
दनशृंगे वै नारायणमुखाच्छ्रुतं १५ कृपया वक्तुनाथोहं नरनारायणस्य च मया तथ्यं च कथितं किं भूयः श्रोतुमिच्छसि १६
बहुलाश्व उवाच नंदगेहे हरिः साक्षाच्छिशुरूपः सनातनः किं चकार बलेनापि तन्मे ब्रूहि महामुने १७ नारद उवाच एकदा शि
ष्यसहितो गर्गाचार्यो महामुनिः शौरिणा मोदितः साक्षादाययौ नंदमंदिरे १८ नंदः संपूज्य विधिवत्पाद्याद्यैर्मुनिसत्तमं ततः प्रदक्षि
णीकृत्य साष्टांगं प्रणनाम ह १९ नंद उवाच अद्य नः पितरो देवाः संतुष्टा अग्नयस्तु नः पवित्रं मंदिरं जातं युष्मच्चरणरेणुभिः २०
मत्पुत्रनामकरणं कुरु द्विज महामुने पृथ्व्यां तीर्थस्वरूपः प्राप्य भवद्गमनं प्रभो २१ गर्ग उवाच ते पुत्रनामकरणं करिष्यामि
न संशयः पूर्ववार्तां गदिष्यामि गच्छ नंद रहःस्थले २२ नारद उवाच उत्थाय गर्गो नंदेन बालाभ्यां च यशोदया एकांते गोव्रजे ग
त्वा तयोर्नाम चकार ह २३ संपूज्य गणनाथादीन्ग्रहान्संशोध्य यत्नतः नंदं प्राह प्रसन्नांगो गर्गाचार्यो महामुनिः २४ गर्ग उवा
च रोहिणीनंदनस्यास्य नामोच्चारं शृणुष्व नः रमंते योगिनो ह्यस्मिन्सर्वत्र रमतीति वा २५ गुणैश्च रमयन्भक्त्या तेन रामं विदुः प
रे गर्भसंकर्षणाद्यस्य संकर्षण इति स्मृतः २६ सर्वावशेषं यच्छेषं बलाधिक्याद्बलं विदुः सपुत्रस्यापि नामानि शृणु नंद यतेह्यतः ३४

गर्ग॰ अथ शृणु पवित्राणि जगतां मंगलानि च ककारः कमलाकांतः ऋकारो राम इत्यपि षकारः षड्गुणसंपन्नः श्वेतदीपनिवासकृत्
गो॰ णकारो नारसिंहोयमकारो अक्षरोग्निभुक् १९ विसर्गौ च तथा ह्येतौ नरनारायणावृषी संप्रलीनाश्च षट्पूर्णा यस्मिन्सिद्धे हि
२५ महामुनि २० परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः शुक्लो रक्तस्तथा पीतो वर्णोस्यानुयुगं धृतः २१ द्वापरांते कलेरादौ
लोयं कृष्णतां गतः तस्मात्कृष्ण इति ख्यातो नाम्नायं नंदनंदनः २२ वसवश्चेंद्रियाणीति तद्देवाश्चित एव हि तस्मिन्यश्चेष्टते सो
पि वासुदेव इति स्मृतः २३ वृषभानुसुता राधा या जाता कीर्तिमंदिरे तस्याः पतिरयं साक्षात्तेन राधापतिः स्मृतः २४ परिपूर्णत
मः साक्षाच्छ्रीकृष्णो भगवान्स्वयं असंख्यब्रह्मांडपतिर्गोलोके धाम्नि राजते २५ सोयं तव शिशुर्जातो भारावतारणाय च कंसा
दीनां वधार्थाय भक्तानां रक्षणाय च अनंतान्यस्य नामानि वेदगुह्यानि संति ते लीलाभिश्च भविष्यंति तत्कर्मसु न विस्मयः २७
अहो भाग्यं तव नंद साक्षाच्छ्रीपुरुषोत्तमः त्वद्गृहे वर्तमानोयं शिशुरूपः परात्परः २८ नारद उवाच इत्युक्त्वाथ गते गर्गे स्वात्मा।
नं पूर्णमाशिषं मेने प्रमुदितः पत्न्या नंदराजो महामतिः २९ अथ गर्गो ज्ञानिवरो ज्ञानदो मुनिसत्तमः कालिंदीतीरशोभाढ्यं
वृषभानुपुरं गतः ३० खंडेन शोभितं दिव्यं द्वितीयमिव वासवं हंडेन राजितं साक्षात् हर्म्यराजमिव स्थितं ३१ तेजसा द्योतितदि
शं साक्षात्सूर्यमिवापरं पुष्कलीमेखलायुक्तं द्वितीयमिव पद्मजं ३२ शोभितं शुक्लवासोभिर्देवं विष्णुमिव स्थितं तं दृष्ट्वा
निशाहूले सहसोत्थाय सादरं ३३ प्रणम्य शिरसा सद्यः सन्मुखो भूत्कृतांजलिः मुनिं च पीठके स्थाप्य पाद्याद्यैरुपचारवित् ४४
पूजयामास विधिवद्गर्गं ज्ञानिनिवरं ततः प्रदक्षिणीकृत्य वृषभानुवरो महान् ३५ वृषभानुरुवाच सतां पर्यटनं शांतं गृ
हिणां शांतये स्मृतं नृणां मनस्तमोहारी साधुरेव न भास्करः ३६ तीर्थीभूता वयं गोपा ज्ञाना त्वद्दर्शनात्प्रभो तीर्थानि तीर्थीकु।
र्वंति त्वादृशाः साधवः क्षितौ ३७ हे मुने राधिका नाम कन्या मे मंगलायना कस्मै वराय दातव्यं वद त्वं मे सुनिश्चितं ३८ त्वं पश्य।
सि त्रिलोकीं दिव्यदर्शनः वरो न यासमो यो वै तस्मै दास्यामि कन्यकां ३९ नारद उवाच हस्तं गृहीत्वा श्रीगर्गो वृषभानुं २५

गर्गं. महामुनिः जगाम यमुनातीरं निर्जने सुंदरस्थले ५० कालिंदीजलकल्लोलकोलाहलसमाकुले तत्रोपविश्य गोपेशं मुनी
गो. द्रः शश्वद्धर्मवित् ५१ गर्ग उवाच हे गोपराज समाख्यातं कथनीयं च तत्त्वया परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं ५२ अ
३९ संख्यब्रह्मांडपतिर्गोलोकेशः परात्परः तस्मात्परो वरो नास्ति जातो नंदगृहे पतिः ५३ वृषभानुरुवाच अहो भाग्यमहो भाग्यं।
नंदस्यापि महामुने श्रीकृष्णस्यावतारस्य सर्वं वै वद कारणं ५४ गर्ग उवाच भुवो भारावतारायकंसादीनां वधाय च ब्रह्म।
णा प्रार्थितः कृष्णो बभूव जगतीतले ५५ श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा त्वद्गृहे सापि संजाता त्वं न जानासि तां परां
नारद उवाच तदा प्रहर्षितो गोपो वृषभानुः सुविस्मितः कलावतीं समाहूय तया सार्द्धं विचार्य च ५७ राधाकृष्णानुभावं च तत्त्वा
त्वा गोपवरः परः आनंदाश्रुकलाकुलं पुनराह महामुनिं ५८ वृषभानुरुवाच अहं दास्यामि हे ब्रह्मन्कन्यां कमललोचनां ब
लायपंथाद्रष्टांतो मे व याकार्यं यदृ हे ५९ गर्ग उवाच अहं न कारयिष्यामि विवाहमनयोर्नृप तयोर्विवाहो भविता भांडीरे का
रण्येति ६० तस्माद्राधां गोपवर विद्धि ह्यर्द्धांगीं परस्य च लोकचूडामणेः साक्षाद्राज्ञीं गोलोकमंदिरे ६१ यूयं सर्वेपि गोपाला
गोलोकादागता भुवि तथा गोप्यश्च गावश्च गोलोके राधिकेच्छया ६२ यद्दर्शनं दुर्लभमेव दुर्घटं देवैश्च यज्ञैर्नरजन्मभिः
किं पुनः सविग्रहं तं नवमंदिराजिरे ललंति गुप्तं व्रजगोपगोपिकाः ६४ नारद उवाच तदा च विस्मितौ राजन्दंपती हर्षितौ परं
राधाकृष्णप्रभावं तं श्रुत्वा श्रीगर्गसूक्ततः ६५ दंपती ऊचतुः राधाशब्दस्य हे ब्रह्मन्व्याख्यानं वद तत्त्वतः त्वत्तो न संशयच्छेत्ता।
कोपि भूमौ महामुने ६६ गर्ग उवाच सामवेदस्य भावार्थं गंधमादनपर्वते शिष्येनापि मया तत्र नारायणमुखाच्छ्रुतं ६७ र
मया रकारः स्यादाकारस्त्वादिगोपिका धकारो धरया ह्यस्यादाकारो विरजा नदी ६८ श्रीकृष्णस्य परस्यापि चत्वारि तेजसो भवन्
लीलाभूः श्रीश्च विरजा चतस्रः पत्न्य एव हि ६९ संप्रलीनाश्च ताः सर्वा राधायां कुंजमंदिरे परिपूर्णतमां राधां तस्मादाहुर्मनीषि
णः ७० राधाकृष्णेति हे गोपये जपंति पुनः पुनः चतुः पदार्थं किं तेषां साक्षात्कृष्णोपि लभ्यते ७१ नारद उवाच तदाति विस्मितो रा ३९

गर्ग० जन्मवृषभानुः प्रियायुतः । तथा कृष्णप्रभावं तं ज्ञात्वा नंदमयो ह्यभूत् ॥ २२ ॥ इत्थं गर्गो ज्ञानिवरः पूजितो वृषभानुना । जगाम स्व
गो० गृहं साक्षान्मुनींद्रः सर्ववित्कविः ॥ २३ ॥ * इति श्रीमद्गर्गसंहितायां गोलोकखंडे नारदबहुलाश्वसंवादे विश्वरूपदर्शनं नंद
३७ पत्न्या श्रीकृष्णनामकरणं पंचदशोऽध्यायः ॥ १५ ॥ * नारद उवाच ॥ गाश्चारयन्नंदनमंकदेशे सं
लालयन्दूरतरं स्वकाशात् । कलिंदजातीरसमीरकंपितं नंदोऽपि भांडीरवनं जगाम ॥ १ ॥ कृष्णेच्छया वेगतरोऽथ वातो घनैरा
भून्मेदुरमंबरं च । तमालनीपद्रुमपल्लवैश्च पतद्भिरेतद्भिरतीव भीकैः ॥ २ ॥ तदांधकारे महति प्रजाते बाले रुदंत्यंकगते तिभीते नंदो
भयं प्राप शिशुं स बिभ्रद्धरिं परेशं शरणं जगाम ॥ ३ ॥ तदैव कोट्यर्कसमूहदीप्तिरागच्छती चाचलती दिशासु बभूव तस्यां वृषभानुपु
त्रीं ददर्श राधां नवनंदराजः ॥ ४ ॥ कोटींदुबिंबद्युतिमादधानां नीलांबरं सुंदरमादिवर्णां । मंजीरधीरध्वनिनूपुराणामाबिभ्रतीं शब्दम
तीव मंजु ॥ ५ ॥ कांचीकलाकंकणशब्दमिश्रां हारांगुलीयांगदविस्फुरंतीं । श्रीनासिकामौक्तिकहेमविंदुभिः श्रीकंठचूडामणिकुंड
लाढ्यां ॥ ६ ॥ तत्तेजसा धर्षित आशु नंदो नत्वाथ तामाह कृतांजलिः सन् । अयं तु साक्षात्पुरुषोत्तमस्त्वं प्रियासि मुख्यासि सदैव रा
धे ॥ ७ ॥ गुप्तं त्विदं गर्गमुखेन वेद्मि गृहाण राधे निजनाथमंकात् । एनं गृहे प्रापय मेघभीतं वदामि चेत्थं प्रकृतेर्गुणाढ्यां ॥ ८ ॥ नमामि
ते त्वं भुवि रक्ष मां त्वं यथेप्सितं सर्वजनैर्दुरापं ॥ राधोवाच ॥ अहं प्रसन्ना तव भक्तिभावान्मद्दर्शनं दुर्लभमेव नंद ॥ ९ ॥ नंद उवाच ॥ य
दि प्रसन्नासि तदा भवेन्मे भक्तिर्दृढा कौ युवयोः पदाब्जे । सतां च भक्तिस्तव भक्तिभाजां संगः सदा मे युगयोर्युगे च ॥ १० ॥ नारद उवाच ॥
तथास्तु चोक्त्वाथ हरिं कराभ्यां जग्राह राधा निजनाथमंकात् । गते च नंदे प्रणतेऽथ व्रजेशे न सा हि भांडीरवनं जगाम ॥ ११ ॥ गोलोकलो
काच्च पुरा प्रसमराना भूमी निजं स्वं वपुरादधाना । या पद्मरागादिखचित्स्वर्णा बभूव सा तत्क्षणमेव सर्वा ॥ १२ ॥ वृंदावनं दिव्यवपुर्दधा
नं वृक्षैर्वरैः कामदुघैः सहैव । कलिंदपुत्री च सुवर्णसौधैः श्रीरत्नसोपानमयी बभूव ॥ १३ ॥ गोवर्द्धनो रत्नशिलामयोऽभूत्स्वर्णाग्रशृं
गैः परितः स्फुरद्भिः । मत्तालिभिर्निर्झरसुंदरीभिर्दरीभिरुच्चांगकरीव राजन् ॥ १४ ॥ तदा निकुंजोऽपि निजं वपुर्दधत्सभायुतं प्रांग । ३७

गर्ग. णादिव्यमंडपं वसंतमाधुर्यधरं मधुव्रतैर्मयूरपारावतकोकिलध्वनि १५ सुवर्णरत्नादिविचित्रकूटैर्हैमं पताकावलिभिर्वि
गो. राजितं सरःस्फुरद्भिर्भ्रमरावलीढितैर्विचर्चितं कांचनवारिपंकजैः १६ तदैव साक्षात्पुरुषोत्तमोत्तमो बभूव कैशोरवपुर्घनप्रभः
३८ पीतांबरः कौस्तुभरत्नभूषणो वंशीधरो मन्मथराशिमोहनः १७ भुजेन संगृह्य हसन्प्रियां हरिर्जगाम मध्ये सुविवाहमंडपं वि
वाहसंभारयुतः समेखलं सदर्भमृद्वारिघटादिमंडपं १८ तत्रैव सिंहासन उत्तमे वरे परस्परं संमिलितौ विरेजतुः परं ब्रुवंतौ मधुरं
च दंपती स्फुरत्प्रभौ खे च तडिद्घनाविव २० तदांबराद्देववरो विधिः प्रभुः समागतस्तस्य परस्य सन्मुखे नत्वा तदंघ्रीडशतीगिरा।
भिः कृतांजलिश्चारुचतुर्मुखोजगौ २१ ब्रह्मोवाच अनादिमाद्यं पुरुषोत्तमोत्तमं श्रीकृष्णचंद्रं निजभक्तवत्सलं स्वयं त्वसंख्यांडप
तिं परं शुभं राधापतिं त्वां शरणं व्रजाम्यहं २२ गोलोकलोकस्त्वमतीवलीलो लीलावतीयं निजलोकलीला वैकुंठनाथोसि यदा त
मेव लक्ष्मीस्तदेयं वृषभानुजा हि २३ त्वं रामचंद्रो जनकात्मजेयं भूमौ हरिस्त्वं कमलालयेयं यज्ञावतारोसि यदा तदेयं श्रीदक्षि
णा स्त्री प्रतिपत्निमुख्या २४ त्वं नारसिंहोसि रमा हृदीयं नारायणस्त्वं च नरेण युक्तः तदा त्वियं शांतिरतीव साक्षाच्छायेव याता च तवा
नुरूपा २५ त्वं ब्रह्म चेयं प्रकृतिस्तटस्था कालो यदेमां च विदुः प्रधानं महान्यदा त्वं जगदंकुरोसि राधा तदेयं सगुणा च माया २६ यदां
तरात्मा विदितश्चतुर्भिस्तदा त्वियं लक्षणरूपवृत्तिः यदा विराड्देहधरस्त्वमेवं तदाखिलं वा भुवि धारणेयं श्यामं च गौरं विदितं
द्विधा महस्त्वैव साक्षात्पुरुषोत्तमोत्तम गोलोकधामाधिपतिं परेशं परात्परं त्वां शरणं प्रपद्ये २८ सदा पठेद्यो युगलस्तवं परं गो
लोकधाम प्रवरं प्रयाति सः इहैव सौंदर्यसमृद्धिसिद्धयो भवंति तस्यापि निसर्गतः पुनः २९ यदा युवां प्रीतियुतौ च दंपती परात्प
रौ तावनुरूपरूपिणौ तथापि लोकव्यवहारसंग्रहाद्विधिं विवाहस्य तु कारयाम्यहं ३० नारद उवाच तदा समुत्थाय विधिर्हुता
शनं प्रज्वाल्य कुंडे स्थितयोस्तयोः पुरः श्रुतेः करग्राहविधिं विधानतो विधाय धाता समवस्थितोभवत् ३१ स वाहयामास हरिं च
राधिकां परं च संस्थाप्य हरेः करं पुनः श्रीराधिकायाः किल पृष्ठदेशके संस्थाप्य मंत्रांश्च विधिः प्रपाठयन् ३२ ततः करांभोजपदं ददौ ३८

गर्ग॰ वस्मालिकांकिंजल्किनीकृष्णगलेल्लिनादिनी करेकराभ्यां वृषभानुजायागलेततश्चवद्भिं प्रणाममथ्यवेदवित् ३४ सुवासयामास
गो॰ सुपीठयोश्चतौकृतांजलीमौनयुतौपितामहः ततोपाठयामासत पंचमंत्रकं समर्प्यराधां वृषभानुवेदकन्यकां ३५ पुष्पाणिदेवाववृषुस्त
३९ दापुनर्विद्याधरीभिर्ननृतुः सुरांगनाः गंधर्वविद्याधरचारणाःकलंसकिन्नराःकृष्णसुमंगलंजगुः ३६ सदंगवीणाम्बुरुयष्टिवेणु
वः शंखानकादुंदुभयः सतालकाः नेदुर्मुहुर्देववरैर्दिविस्थितैर्जयेतिशब्दैर्मंगलशब्दयुक्तैः ३७ उवाचतत्रैवविधिंहरिःस्वयंयथो
चितंनववटविष्टदक्षिणां ततःहरिंप्राहविधिःप्रभोमेदेहित्वदंघ्र्योर्निजभक्तिदक्षिणां ३८ तथास्तुवाक्यंवदतोविधिर्हरेः श्रीराधि
कायाश्चपदद्वयंशुभं ननामकराभ्यांशिरसापुनःपुनर्जगामदेहगृहंप्रहर्षितः ३९ ततोनिकुंजेषुचतत्रविधानैर्दिव्यंमनोज्ञंप्रिय।
याशरदं जवात्सकृष्णः प्रहसन्नराधाकृष्णेनदत्तंकमलंचराधा ४० ततःकरेणापिकरंप्रियायाः हरिर्गृहीत्वाप्रचचालकुंजे जगा
मजल्पन्मधुरंप्रपश्यन्वृंदावनेश्रीयमुनालताश्च ४१ श्रीमल्लताकुंजनिकुंजमध्येविलीयमानंप्रहसंतमेव विलोक्यशार्ङ्गोनतरिते
चराधाजगादपीतांबरमाव्रजंती ४२ दृष्ट्वावराधाहरिहस्तपद्माङ्ककारमेवं प्रतिकुर्वतीसो निलीयमानायमुनानिकुंजेपुनर्व्र।
जंतीहरिहस्तमाज्ञात ४३ यथाब्दमालःकलधौतवल्याचनीयथाचंचलयावकास्ति नीलोद्गिराज्जोनिकषाश्मत्वन्याश्रीराधयास।
ल्लतयारमाएषा ४४ श्रीरासरंगेजनवर्जितेपरेरेमेहरोरासरसेनराधया वृंदावनेभृंगमयूरकोकिलैर्हूनेचरन्नेवरतीखरःपरं ४५
श्रीराधयाकृष्णहरिःपरात्माननंनगोवर्द्धनकंदरासु मतालिपुष्पश्रवणैःसरोभिर्विराजितासुद्युतिमल्लतासु ४६ चचारकृष्णो
यमुनांसमेत्यवरंविहारंवृषभानुपुत्र्या राधाकराकृष्णदलंस्वपद्मं धावन्रहीत्वायमुनाजलेषु ४७ राधाहरेःपीतपटंचवंशी
वेत्रेगृहीत्वासहसाहसंती देहीतिवंशींवदतोहरेश्चजगादराधाकमलंतुदेहि ४८ तस्मैददौदेववरोपपद्मंराधाददौपीतपटंचवं
शीं वेत्रंवत्सस्मेहर्षयेनयोःपुनर्वभूवलीलायमुनानदेषु ४९ ततश्चभांडीरवटेप्रियायुतश्चकारशृंगारमलंमनोज्ञं पत्रावलीया।
वककज्जलाद्यैःपुष्पैःस्वरत्नैर्व्रजगोपरत्नैः ५० हरेश्चशृंगारमलंप्रकर्तुंसमुद्यतानत्वयदाहिराधा तदेवकृष्णस्त्ववभ्रूववालोवि ३९

गर्ग· हायकैशोरवपुः स्वयं हि ५१ नंदेन दत्तं शिशुमेव पाहि शोभूमौ लुठंतं प्ररुदंतमाभयात् दृष्ट्वा विलोक्याशु हरोदरादिकांतनोपि
गो· मायां तु कथं हरेर्मापि ५२ इत्थं रुदंतीं सहसाविषण्णां माकाशवागाह ततैव राधां शोचं तु राधे इह माकुरुत्वं मनोरथस्ते भविता
५० द्रिपश्चात् ५३ श्रुत्वाथ राधा हरिहरितं गृहीत्वा गतास्तु गेहे व्रजराजपत्न्याः दत्वाथ बालं किल नंदपत्न्या शुवाच दत्तं पथि नीचमर्त्री ५४
उवाच राधां नृपनंदगेहिनी धन्यासि राधे वृषभानुकन्यके त्वया शिशुर्मे परिपालितो भयान्मेचा हृते व्योम्नि भयातुरेवने ५५ संपू
जिता सद्गुणा श्लाघिता च सा संनंदिता सा वृषभानुपुत्री यदा स्वतं ताप्य यशोमती सा शनैः स्वगेहं निजमाजगाम ५६ इत्थं हरेर्गुप्त
कथा च वर्णिता राधाविवाहस्य सुमंगलावृता श्रुता च ये वै पठिता च ध्यायिता ताप्याय ह्वंद्वा न कदापि संशंति ५७ ॥ इति श्रीमद्ग
र्गसंहितायां गोलोकखंडे श्रीराधिकाविवाहवर्णनं नाम षोडशोऽध्यायः १६ ॥ नारद उवाच श्रृणुवालौ रामकृष्णौ गौर
श्यामौ मनोहरौ लीलया चक्रतुर्लंसद्दूरं नंदमंदिरं १ रिंगमाणौ च जानुभ्यां पाणिभ्यां सह मैथिल व्रजतां स्थेन कालेन त्रुवं
तौ मधुरं व्रजे २ यशोदया च रोहिण्या लालितौ पोषितौ शिशू कदाचिनिर्गतावेकात्कचिद्वंद्वैस्समाश्रितौ ३ मंजीरकिंकिणीराव
कुर्वंतौ ताविततस्ततः त्रिलोकीमोहयंतौ द्वौ मायावालकविग्रहौ ४ क्रीडंतमादाय शिशुं यशोदाजिरे लुठंतं व्रजवालकैस्तु तद्रू
लिलेपांत एनत्यूसरांगं चक्रे स्वलेपं शिशुमातलान ५ जानुद्वयाभ्यां च समं कराभ्यां पुनर्व्रजं त्वांगणमेत्य कृष्णः मातुः कदे शेषु
नराव्रजजस्त्वेव भौवजे केसरिवाललीलः ६ तं सर्वतो हेमनचित्रयुक्तं पीतांबरं कंचुकमाद्यथानं स्फुरत्सभंरत्नमयं च मौलिं
दृष्ट्वा सुतं शाय सुदं यशोदा ७ वालं मुकुंदमतिसुंदरवालकेलिं दृष्ट्वा परं मुदमवापुरतीव गोप्यः श्रीनंदराजव्रजमेत्य गृहं विहा
य सर्वास्त्विस्मृतगृहाः स्ववेविग्रहास्ताः ८ श्रीनंदराजगृहकृत्तिमसिंहरूपं दृष्ट्वा व्रजस्त्रतिरवन्नृपभीरुवायः नीत्वाचतं निज
सुतं गृहमाव्रजंती गोप्यो व्रजे सहृणया स्वबदंसशोदां ९ गोप्यऊचुः क्रीडार्थं चपलेत्वेनं मा वहिः कारयांगणात् वालकेलिंउ
ग्रं सुखं काकपत्तपरंशुभे १० कृष्ण दंतद्वयं जातं पूर्वं मातुलदोषदं अस्यापिमातुलो नास्ति ते सुतस्य यशोमति ११ तस्माद्दानं तु ५०

ग॰गी॰ कर्त्तव्यं विघ्नानां नाशहेतवे गोविप्रसुरसाधूनां छंदसां पूजनं तथा १२ नारदउवाच तदा यशोदा रोहिण्यौ सुतकल्याणहेतवे
गो॰ वसुरत्नवस्त्राणां नित्यं दानं प्रचक्रतुः अथ व्रजे रामकृष्णौ वालसिंहावलौकिकौ पश्यंतौ वलितौ घोषेषु वर्द्धमानौ वभूवतः १४
४१ श्रीदामसवलाद्यैश्च वयस्यैर्व्रजवालकैः यमुनासिकते शुभ्रे लुठंतौ सकुतूहलौ १५ कालिंदुपवने पुष्पैस्तमालैः सघने हूते
करंवकुंजशोभाढ्ये चेरतू रामकेशवौ १६ जनयंतो गोपीनामानंदं वाललीलया वयस्यैश्चोरयामास नवनीतं हृतं हरिः १७
एकदा तु यनंदस्य पत्नी नाम्ना प्रभावती श्रीनंदमंदिरं प्राप्य यशोदां प्राह गोपिका १८ प्रभावत्युवाच नवनीतं हृतं दुग्धं दधितक्रं
यशोमति आवयोर्भेदरहितं त्वत्सुतस्य सदाह्यमे भवत् १९ नाहं वदामि चानेन स्तेयं कृतापि शिक्षिते शिक्षां करोषि न सुते नवनीतमु-
षिस्वतः २० यदा मया कृता शिक्षा तदाह पुत्रस्तवांगजः गालीप्रदानं दत्वायं द्रवति प्रांगणान्मम २१ व्रजाधीशस्य पुत्रोयं भूत्वा स्तेयं
समाचरेत् न मया कथितं किंचिद्यशोदे तव गौरवात् २२ नारदउवाच श्रुत्वा प्रभावती वाक्यं यशोदा नंदगेहिनी वालं निर्भर्त्स्य
तामाह सास्त्राश्रेमपरायणा २३ यशोदोवाच गवां कोटिर्गृहे मेस्ति गोरसैराहिताचला नजाने दधि मद्वालो नास्ति सोत्र कदाचन २४
पुत्रेण मुषितं गव्यं तत्समेतं गृहाण मे ते शिशोर्मे शिशोर्भेदो नास्ति किं विस्मभावति २५ नवनीतमुषं चैनमद्य तौत्यानयिष्यति त-
दा शिक्षां करिष्यामि भर्त्सनं वधनं तथा २६ नारदउवाच श्रुत्वा वाक्यं तदा गोपी प्रसन्ना स्वगृहमागता एकदा दधिचौर्यार्थं कृष्ण-
स्तस्या गृहं गतः २७ वयस्यैर्वालकैः सार्द्धं पार्श्वं कुड्येरहस्य च हस्ताद्धस्ते सरहीत्वा शनैः कृष्णो विवेश ह २८ शिक्यस्थं गोरसं ह-
र्तुं हस्ताग्राह्ये हरिः स्वयं उलूखले पीठके च गोयानुस्थाप्यारुरोहतं ३० भग्नभांडात्स्वयं गव्यं वहद्भूमौ मनोहरं जघास सवलो मर्कैः
वालकैः सह माधवः ३१ भग्नभांडस्वनं श्रुत्वा प्राप्ता गोपी प्रभावती पलायितेषु वालेषु जग्राह श्रीकरे हरेः ३२ नीत्वासरषाक्षंभी-
रुंचगच्छंती नंदमंदिरं अग्रे नंदं स्थितं दृष्ट्वा प्रस्वेदस्तंवकारह ३३ हरिर्विचिंतयन्नित्यं माता दंडं प्रदास्यति दधार तद्वालरूपं स्वच्छं-
दगतिरीश्वरः ३४ सा यशोदां समेत्याशु प्राह गोपी रुषान्विता भांडं भग्नीकृतं सर्वं मुषितं दध्यनेन वै ३५ यशोदोवाच अपवादोय

गर्ग· दाद्देयो निर्वासं क्रूरकर्मेश्वरात् शुष्मस्त्वत्कृते वीर्यं शुष्मस्त्वत्कृतं भवेत् २६ जनलज्जासमायुक्ता दूरीकृत्य शुखोवरं सापि प्राहनिजं
गो· वालंवीक्ष्यविस्मितमानसा २७ निपद्दस्तं कृतः श्यामो वज्रसारोसि मे करे वदंतीत्थं चनं नीत्वा निर्गतानंदमंदिरात् २८ यशोदारो
४२ हिणी नंदो रामो गोपाश्च गोपिकाः जहसुः कथयंतस्ते हृष्यो न्यायो व्रजे महान् २९ भगवांस्तु वहिर्वीथ्यां भूत्वा श्रीनंदनंदनः प्रहस
न्गोपिकां प्राह पृष्टां गच्छ वलेतराः ३० श्रीभगवानुवाच पुनर्मां यदि रात्रौसि कदाचिद्यदि गोपिके तेभर्तृरूपं तनदाभविष्यामि
न संशयः ३१ श्रीनारदउवाच श्रुत्वा सविस्मिता गोपी गता गेहे च मैथिल तदा सर्वा गृहे गोप्यो न गच्छंति हरिं द्विज ३२ ॥ इति श्री
मद्गर्गाचार्यसंहितायां गोलोकखंडे श्रीकृष्णबालचरित्रे दधिस्तेयवर्णनं नाम सप्तदशोध्यायः १७ ॥ नारदउवाच गोपीगृहेषु
विचरन्नवनीतचोरः श्यामो मनोहरवपुर्नवकंजनेत्रः श्रीबालवंद्द्वबलव्धिगतो नराणां चित्तं हरन्निववलेनचकारशोभां १ श्रीनंद
नंदनमतीवबले गृहीत्वा रोहं निधाय शुभुद्र नवनंदगोपाः सत्कुंडकैश्च समनं परिलालयंतः कृष्णेन कूजितसर्वोनजयन्स्मरंतः २
राजोवाच नवोपनंदनामानि वद देवऋषे मम अहो भाग्यं तु येषां वै ते पूर्वं कस्माद्गताः ३ अथा षट्वृषभानूनां कर्माणि मंगलानि
च नारदउवाच गयश्च विमलः श्रीशः श्रीधरो मंगलायनः ४ मंगलो रंगवल्लीप्रगौ रंगोजिद्दैवतायनः नवनंदाश्च कथिता वभूवुर्गो
कुले व्रजे ५ वीतहोत्रोग्निभुक्सांवः श्रीकरो गोपतिः श्रुतः व्रजेशः पावनः शांत उपनंदाः प्रकीर्तिताः ६ नीतिविन्मार्गदः शुक्लः
पतंगो दिव्यवाहनः गोपेष्टश्च व्रजे राजन्ज्ञातः षट्वृषभानवः ७ गोलोककृष्णचंद्रस्य निकुंजद्वारिमास्थिताः वेत्रहस्ताः श्याममंगा
नवनंदाश्च ते स्मृताः ८ निकुंजे कोटिशो गावस्तासां पालनतत्पराः वंशीमयूरपत्राढ्या उपनंदाश्च ते स्मृताः ९ निकुंजदुर्गरक्षायां
दंडपाशधराः स्थिताः षट्द्वारमास्थिताः षट्वै कथिता वृषभानवः १० श्रीकृष्णस्येच्छया सर्वे गोलोकादागता भुवि तेषां प्रभावं वक्तुं
हि न समर्थश्चतुर्मुखः ११ यद्गेहं किं तु वदिष्यामि तेषां भाग्यं महोदयं तेषामारोहमास्थाय वालकेलिर्वभौ हरिः १२ एकदा यमुनातीरे
रेमत्कृष्णेनावलीढित्वा यशोदां वालकाः प्राहुः रत्निवालोमदं तव १३ वलभद्रेचवदति तदा सा नंदगेहिनी करे गृहीत्वा स्वसुतं भीरू ४२

ग.सं. नेदं मृद्वा वद ॥१४॥ यशोदोवाच ॥ कस्मान्मृदं भक्षितवान् रहो हे भवान्वयस्याश्च वदंति साक्षात् ज्यायानलोऽयं वदति प्रसिद्धं माधव सत्यमर्थं न
गो जहाति नेदं ॥१५॥ श्रीभगवानुवाच ॥ सर्वे मृषावादरता व्रजार्भका मातर्भयात्क्वापि न मन्मृद्भक्षिता ॥ यद्यसमीचीनमनेन वाक्यं तदा
४२ मुखं प्रपश्य मदीयमंजसा ॥१६॥ श्रीनारद उवाच ॥ श्रुत्वा गोपी बालकस्य प्रपन्नी संदर्शं मुखं प्रसारितं तद्ददर्श ब्रह्मांडं रचितं गुणैः ॥१७॥
सप्तद्वीपाब्धिसरिन्मेरुखंडांस्तागिरीन्तथान् आ ब्रह्मलोकांस्तीर्णा गोपी स्वात्मभिः सव्रजैः सह ॥१८॥ दृष्ट्वा निमीलिताक्षी सा भूत्वा श्री
यमुनातटे बालोऽयं मे हरिः साक्षादिति ज्ञानमयी ह्यभूत ॥१९॥ तदा जहार सश्रीकृष्णो मोहयन्निव मायया यशोदा वैभवं दृष्टं न सस्मार
गतस्मृतिः ॥२०॥ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे ब्रह्मांडदर्शनं नामाष्टादशोऽध्यायः ॥१८॥ श्रीनारद उवाच ॥ एकदा गो
कुले गोप्यो ममंथुर्दधि सर्वतः गृहे गृहे प्रगायंत्यो गोपालचरितं परं ॥१॥ यशोदापि समुत्थाय प्रातः श्रीनंदनंदनं भांडे रायं विनिति
पामसं मंथदधि सुंदरी ॥२॥ मंजीररावं संकुर्वन्बालः पार्श्वमथाभ्रमत् स्वनादि किंकिणीसंच कंकारंकारयन्मुहुः ॥३॥ हैयंगवीनं
सततं नवीनं याचन्स मातर्मधुरं ब्रुवन्सः आदाय हस्ते प्रसभं तत रुषा सधीविभेद कृष्णोदधिमंथपात्रे ॥४॥ पलायमानं स्वसुतं य
शोदा प्रधावती श्राप न हस्तमात्रात् योगीश्वराणामपि यो दुरापः कथं समायाति गृहीणीप्रयाति ॥५॥ तथापि भक्तेषु च भक्तवश्यता प्रद गु:
र्शिता श्रीहरिणा न पेश्वर बालं गृहीत्वा स्वसुतं यशोमती बबंध रज्ज्वा तु रुषा तदुलूखले ॥६॥ यदा यदा यं दृढदाम तत्तु न्यूनं पुनः॥ ५४
नमसौ यशोदा गुणैर्न बद्धः प्रकृतेः परो यः कथं स बद्धो भवतीह दाम्ना ॥८॥ यदा यशोदा गतवं बंधने बभूव खिन्ना निरवज्ञान्त परिखिन्न.
मानसा आसीत्तदायं कृपया स्वबंधे स्वच्छंदयानः स्वयशोपि कृष्णः ॥९॥ एवं प्रसादो नहि वीतकर्मणां न ज्ञानिनां कर्मधियां कुतः पु
नः मातर्यथाभूत्स परात्परस्मात्सर्वक्तिव्यथाकृतिमलं न माधवः ॥१०॥ तदैव गोप्यस्तु समागतास्त्वरं दृष्ट्वाथ भग्नं दधिमंथभाजनं
उलूखले बद्धमतीव दामभिर्भ्रांतं शिशुं वीक्ष्य जगुर्हृणान्तराः ॥११॥ गोप्य ऊचुः ॥ अस्मद्गृहेषु पात्राणि भिनत्ति सततं शिशुः न दध्यते।
नो वदामः कारुण्यात्त्वं दृष्टो हि नो ॥१२॥ गतव्यथे सुकरुणे यशोदे देहि व्रजेश्वरि यष्ट्यानिर्भर्त्सितो बालस्त्वया बद्धो वटस्त्वयात ॥१३॥ नार ४३

गर्ग० दउवाच इत्थंकृष्णायांयशोदायांव्यग्रायांगृहकर्मसु कर्षन्नुलूखलंकृष्णोबालैःश्रीयमुनांययौ १४ तत्रदेवमहावृक्षौपुराणौयमलार्जु
गो० नौ तयोर्मध्येगतःकृष्णोदृढसक्तदामोदरःप्रभुः १५ चकर्षसहसाकृष्णःतिर्यग्गतमुलूखलं कर्षणेनसमूलौद्वौपेततुर्भूमिमंडले १९
४४ पतनेनापिशाखीभूस्यचंडोवज्रपातवत् विनिर्गतौतौचवृक्षाभ्यांदेवौद्वावयसोग्निवत् १७ दामोदरंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना
कृतांजलीहरिंनत्वाततौतत्रस्तुवेस्थितौ १८ देवावूचतुः आवांमुक्तौवरददंडात्त्वयस्तेच्युतदर्शनात् माभूतेनिजभक्तानांहेल
नंत्वावयोर्हरे १९ करुणायिपतनभंजनाभंगलशीलिने दामोदरायकृष्णायगोविंदायनमोनमः २० नारदउवाच इतिनत्वा
हरिंतौद्वौउदीचींचदिशंगतौ तदैवआगतःसर्वेनंदाद्याःभयकातराः २१ कथंवृक्षौप्रपतितौविनावातंव्रजार्भकाः वदताशुत।
दावालाऊचुःसर्वेव्रजौकसः २२ अनेनपतितौवृक्षौनाभ्यांद्वौपुरुषौस्थितौ एवंनत्वागतानाद्यताउदीच्यांस्फुरत्प्रभौ २३ नार
दउवाच इतिश्रुत्वावचस्तेषांनतेश्रद्दधिरेततः अमोचनंदःस्वबालंदाम्नावद्धमुलूखले २४ संलालयन्स्वांकदेशेसमाघ्राय।
शिशुंनृप बहुलाश्वउवाच केनदोषेणवृक्षत्वंप्रापितौयमलार्जुनौ २५ नारदउवाच नलकूबरमणिग्रीवौराजराजसुतौपरौ
जग्मतुर्नंदनवनेमंदाकिन्यास्तटेस्थितौ २६ अप्सरोभिर्गीयमानौचेरतुर्गतवाससौ वारुणीमदिरामत्तौयुवानौद्रव्यदर्पितौ २७
कदाचिद्देवलोनाममुनीन्द्रोदेवपारगः नग्नौदृष्ट्वाचतावाहदुष्टशीलौगतस्मृती २८ देवलउवाच युवांवृत्तसमौदृष्टौनिर्ल
ज्जौद्रव्यदर्पितौ तस्माद्वृक्षौतुभूयास्तांवर्षाणांशतकंभुवि २९ द्वापरांतेभारतेचमाथुरेव्रजमंडले कालिंदनंदिनीतीरेम
हावनसमीपतः ३० परिपूर्णतमंसाक्षात्कृष्णंदामोदरंहरिं गोलोकनाथंतंदृष्ट्वापूर्वरूपौभविष्यथ ३१ नारदउवाच इ
त्थंदेवलशापेनवृक्षत्वंप्रापितौनृप नलकूबरमणिग्रीवौश्रीकृष्णेनविमोचितौ ३२ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांगोलो
कखंडेयमलार्जुनभंगोनामचतुर्दशोध्यायः १४ ॥ नारदउवाच एकदाकृष्णचंद्रस्यदर्शनार्थंपरस्यच दुर्वासामुनिशार्दू
लव्रजमंडलमाययौ १ कालिंदीनिकटेपुण्येसैकतेरमणस्थले महावनसमीपेचकृष्णमाहृददर्शह २ श्रीमन्मदनगो। ४४

पालं लुठंतं बालकैः सह परस्परं प्रयुद्धंतं बालकेलिमनोहरं ३ धूलिधूसरसर्वांगं वक्रकेशं दिगंबरं धावंतं बालकैः सार्द्धं
हरिं वीक्ष्य स सुस्मितं ४ मुनिरुवाच यदीश्वरोयं भगवान्कथं बालैर्लुठन्भुवि प्रयुक्तं नंदपुत्रोसौ न श्रीकृष्णः परात्परः ५ ना
रद उवाच इत्थं मोहागते तत्र दुर्वाससि महामुनौ क्रीडन्कृष्णस्तत्समीपे तदंके ह्यागतः स्वयं ६ हसतस्तस्य वक्त्रे वै प्रविष्टः श्व
सनैर्भुवि ददर्शान्यं महालोकं सारण्यं जनवर्जितं ७ अरण्ये भ्रमंस्तत्र कुतः प्राप्त इति ब्रुवन् तदैवाजगरेणापि निगीर्णोभून्म
हामुनिः ८ ब्रह्मांडं तत्र ददृशे सलोकं सकलं परं भ्रमन्द्वीपेषु स मुनिः स्थितोभूत्पर्वते सिते ९ ततस्तताप वर्षाणां शतकोटिः।
प्रभुं भजन् नैमित्तिकाख्ये प्रलये प्राप्ते विश्वभयंकरे ११ आगच्छत्समुद्रस्तं प्लावयंतो यतस्तले वहंस्तेषु च दुर्वासा न प्राप यांतं।
जलस्य च १२ व्यतीते युगसाहस्रे मग्नोभूद्विगतस्मृतिः पुनर्जलेषु विवरं तु मग्नं ददर्श ह १३ तच्छिद्रे च प्रविष्टोसौ दिव्यो स।
ष्टिगतस्ततः तदंडमूर्ध्नि लोकेषु विधेरायुः समं चरन् १४ एवं छिद्रं ततो वीक्ष्य प्रविशन्स हरिं स्मरन् वहिर्विनिर्गतो ब्रह्मांडाद्द
दर्श स महाजलं १५ तस्मिञ्जले तु लक्षं ते कोटिशो ह्यंडराशयः ततो मुनिर्जलं पश्यन्ददर्श विरजां नदीं १६ तत्पारं प्रगतः सा
क्षाद्गोलोकं प्राविशन्मुनिः वृंदावनं गोवर्द्धनं यमुनां पुलिनं शुभं १७ दृष्ट्वा प्रसन्नः स मुनिर्निकुंजं प्राविशत्ततः गोपगोपीगणैः।
कीर्तिगवां कोटिभिरन्वितं १८ असंख्यकोटिमार्तंडज्योतिषां मंडले ततः दिव्ये लक्षदले पद्मे स्थितं राधापतिं हरिं १९ परिपूर्ण
तमं साक्षात्कृष्णं पुरुषोत्तमं असंख्यब्रह्मांडपतिं गोलोकं स ददर्श ह २० श्रीकृष्णस्यापि हसतः प्रविष्टस्तन्मुखे मुनिः पुन
र्विनिर्गतः पश्यद्बालं श्रीनंदनंदनं २१ कालिंदीनिकटे पुण्ये सैकते रमणस्थले बालकैः सहितं कृष्णं विचरंतं महावने २२ त
दा मुनिश्च दुर्वासा ज्ञात्वा कृष्णं परात्परं श्रीनंदनंदनं नत्वा नत्वा प्राह कृतांजलिः २३ मुनिरुवाच बालं नवीनशतपत्रविशाल
नेत्रं बिंबाधरं सघनमेघरुचिं मनोज्ञं मंदस्मितं मधुरसुंदरमंदयानं श्रीनंदनंदनमहं मनसा नमामि २४ मंजीरनूपुररणन्न
वरत्नकांचीश्रीहारकेसरिनखप्रतियंत्रसंघं दृष्ट्यार्तिहारिमसिबिंदुविराजमानं वंदे कलिंदतनुजातटबालकेलिं २५ पू

नींदुसुंदरमुखोपरि कुंचिताग्राः केशा नवीनघननीलनिभाः स्फुरंति राजंत आनतशिरः कुमुदस्य यस्य नंदात्मजाय सबला
य नमो नमस्ते २६ श्रीनंदनंदनस्तोत्रं प्रातरुत्थाय यः पठेत् तन्नेत्रगोचरो याति सानंदं नंदनंदनः २७ इति प्रणम्य श्रीकृष्णं संस्तु
वीसा मुनिसत्तमः तं ध्यायन्स जपन्सागात् बदर्याश्रमसत्तमे २८ गर्ग उवाच इत्थं देवर्षिवर्येण नारदेन महात्मना कथितं कृष्ण
चरितं बहुलाश्वाय धीमते २९ मया ते कथितं ब्रह्मन्नृपयशः कलिमलापहं चतुःपदार्थदं दिव्यं किं भूयः श्रोतुमिच्छसि ३० शौ
नक उवाच बहुलाश्वो मैथिलेंद्रः किं पप्रच्छ महामुनिं नारदं ज्ञानदं शांतं तन्मे ब्रूहि तपोधन ३१ गर्ग उवाच नारदं ज्ञानदं नत्वा
मानदो मैथिलो नृपः पुनः पप्रच्छ कृष्णस्य चरित्रं मंगलायनं ३२ बहुलाश्व उवाच श्रीकृष्णो भगवान्साक्षात्परमानंदविग्रहः
अपरं चकार किं चित्रं चरित्रं वद मे प्रभो ३३ पूर्णावतारैश्चरितं कृतं वै मंगलायनं अपरं किं तत्कृष्णस्य पवित्रं किमतः परं ३४
नारद उवाच साधु साधु त्वया पृष्टं चरित्रं मंगलं हरेः तन्नेहं संप्रवक्ष्यामि हृदाराण्येषियशः ३५ इदं गोलोकखंडं च शृणु त्वं परम
मद्भुतं श्रीकृष्णेन प्रकथितं गोलोके रासमंडले ३६ निकुंजे राधिकायै च राधा मह्यं ददाविदं मया तुभ्यं प्रदत्तं च सर्वा
र्थदं परं ३७ इदं पठति विप्रस्तु स सर्वशास्त्रार्थगो भवेत् क्षत्रो वै चक्रवर्ती स्यात्त्रिविपक्षचंडविक्रमः ३८ वैश्यो निधिपतिर्भूया
च्छूद्रो मुच्येत बंधनात् निष्कलोऽपि जगति जीवन्मुक्तः संजायते ३९ यो नित्यं पठते सम्यक् भक्तिभावसमन्वितः स गच्छेत्
कृष्णचंद्रस्य गोलोकं प्रकृतेः परं ४० ✱ इति श्रीमद्गर्गाचार्यसंहितायां गोलोकखंडे नारदबहुलाश्वसंवादे भगवज्जन्मवर्णि
नं डवीसखे महाधरप्रदर्शनं श्रीनारदस्तोत्रवर्णनं नाम विंशोऽध्यायः २० ✱ समाप्तोऽयं गोलोकखंडः ॐ अतः परं वृंदार
ण्यखंडं भविष्यति ✱ शुभमस्तु लेखकपाठकयोः ✱ छापेखाने मित्रविलास लाहोर में छपा प्रथमः १

1582

1583

श्रीगणेशायनमः कृष्णातीरेकोकिलाकेलिकीरेगुंजापुंजेदेवपुष्पादिकुंजे कंतुश्रीदोर्विलासबाहूवलंतौराधाकृष्णौमंगलं
मेभवंतां १ अज्ञानतिमिरांधस्यज्ञानांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः १ नारदउवाच एकदोपद्रवं।
वीक्ष्यनंदोनंदान्सहायकान् वृषभानूपनंदांश्चवृषभानुवरांस्तथा २ समाहूयपरान्वृद्धान्सहायांस्तत्रवाचह श्रीनंदराजउ
वाच किंकर्तव्यंत्रवदतोत्पाताः संतिमहावने ४ श्रीनारदउवाच तेषांश्रुत्वाथसंनंदोगोपवृद्धोतिमंत्रवित् अंकेनीत्वाराम
कृष्णौनंदराजमुवाचह ५ श्रीसंनंदउवाच उत्थातव्यमितोस्माभिः सर्वैःपरिकरैःसह गंतव्यंचान्यदेशेषुयत्रोत्पातानसंति
हि ६ बालस्तेषांप्राणवल्लभोजीवनंव्रजवासिनां व्रजेयत्नेकुलेदीपोमोहनोबाललीलया ७ हाबक्याशकटेनापितृणावर्ते
नबालकः मुक्तोयंद्रुमपातेनउत्पातःकिमतःपरं तस्माद्वृंदावनेसर्वैर्गंतव्यंबालकैःसह उत्पातेषुव्यतीतेषुपुनरागमनं।
कुरु ८ श्रीनंदउवाच कतिक्रोशैर्विस्तृतंतद्वृंदावनंव्रजे तल्लक्षणंतत्त्वंचवदबुद्धिमतांवर ९ श्रीसंनंदउवाच प्रागु
दीच्यांवर्हिषदोदक्षिणस्यांयदोःपुरात् पश्चिमायांशोणपुरात्माथुरंमंडलंविदुः १० विंशद्योजनविस्तीर्णंसार्द्धंपंचयोजनेन.
वै माथुरंमंडलंदिव्यंव्रजमाहुर्मनीषिणः ११ मथुरायांशौरिगृहेगर्गाचार्यमुखाच्छ्रुतं माथुरंमंडलंदिव्यंतीर्थराजेनपूजि
ते १२ वृंदेभ्यस्तत्रसर्वेभ्योवनेभ्योवृंदावनंवरं परिपूर्णतमस्यापिलीलाक्रीडंमनोहरं १३ वैकुंठाज्ञापरोलोकोनभूतोनभविष्य
ति एवंवृंदावनंनामवैकुंठाद्यपरात्परं १४ यत्रगोवर्द्धनोनामगिरिराजोविराजते कालिंदीनिकटेयत्रपुलिनंमंगलायनं १५
वृहत्सानुगिरिर्यत्रयत्रनंदीश्वरोगिरिः क्रोशानांचचतुर्विंशद्विस्तृतैःकाननैर्वृतं १६ पशव्यंगोपिगोपीनांगवांसेव्यंमनोहरं
लताकुंजवृतंतत्तद्वैवनंवृंदावनंस्मृतं १७ श्रीनंदउवाच कदाव्रजोयंसंनंदतीर्थराजेनपूजितः एतद्वेदितुमिच्छामिपरंकौतू
हलंहिमे १८ श्रीसंनंदउवाच शंखासुरोमहादैत्यःपुरानैमित्तिकेलये स्वपतोब्रह्मणःसोपिवेदस्तुदैत्यपुंगवः १९ जित्वा
देवान्ब्रह्मलोकाद्धृत्वावेदान्नानार्णवे गतेषुपदिवेदेषुदेवानांचमहीतले २० तदासाक्षाद्धरिःपूर्णोधृत्वामात्स्यंवपुःपरं मे

मा. मितिकलयंभोयोद्धुंयुध्येतेनयत्नवान् ११ शूलं विदेव प्रहारेषे शंखो दैत्य महाबलः स चक्रेण हरिः साक्षात् तच्छूलं शतधाकरोत् १२
हं हरिं तताड शिरसा शंखो विष्णुरुरस्थले तस्य मूर्ध्नि प्रहारेण न चचाल पराम्परः १३ ततो गदां समादाय मत्स्यरूपधरो हरिः दृढे
१ जघान तं दैत्यं शंखरूपं महाबलं १४ गदाप्रहारव्यथितः किंचिद्व्याकुलमानसः पुनरुत्थाय सर्वेशं मुष्टिना सन्तताड ह १५ त
दा विष्णुः स्वचक्रेण समुत्कृत्य तच्छिरो दृढं जहार कुपितः साक्षात् भगवान् कमलेक्षणः १६ जित्वा शंखं देववरैः सार्द्धं विसर्जनेश्वरं
प्रयागमेत्य स हरिर्वेदांस्तान् न्यस्तवान् दृढौ १७ यज्ञं चकार विधिवत् सर्वैर्देवगणैः सह प्रयागं च समाहूय तीर्थराजं चकार ह १८
तस्मात्त्वक्षयवटः कृतो लीलातपत्रवत् श्रुनिभाजुसते स्तोभिचामरैस्तैर्विरेजतः २९ ततो देव सर्वतीर्थानि जंबूद्वीपस्थितानि च
नीत्वा बलिं समाजग्मुस्तीर्थराजाय धीमते ३० तीर्थराजं च संपूज्य नत्वा तीर्थानि सर्वतः स्वधामानि ययुर्नंद हरौ देवं गते सति ३१
ततो देव नारदः प्राप्तो मुनीन्द्रः कलहप्रियः सिंहासने राजमानं तीर्थराजमुवाच ह ३२ श्रीनारदउवाच तीर्थैः प्रपूजितस्त्वं वै तीर्थ
राजमहामते तभ्यं च सर्वतीर्थानि श्रुत्वा नीतबलिं दृढः ३३ व्रजावृंदावनादीनि नागतानीह ते प्रभुः तीर्थानां राजराजस्त्वं प्रभ
ते स्तेक्षिरः कृतः ३४ श्रीनंदउवाच इति प्रभाष्य तं साक्षात् गते देवर्षिसत्तमे तीर्थराजस्तदा क्रुद्धो हरिलोकं जगाम ह ३५ त
त्राहरिं परिक्रम्य पुरःस्थित्वा कृतांजलिः सर्वतीर्थैः परिवृतः श्रीनाथं प्राह तीर्थराट् ३६ तीर्थराजउवाच हे देवदेव प्राप्तोहं ती
र्थराजस्त्वया कृतः बलिं ददुर्मे तीर्थानि माथुरं मंडलं विना ३७ प्रमत्तैर्व्रजतीर्थैश्च नैरहं तत्तिरस्कृतः तस्मात्तथ्यं च कथितं प्र
भोहं तव मंदिरे ३८ श्रीभगवानुवाच धरायां सर्वतीर्थानां त्वं कृतस्तीर्थराट् मया किं तस्य गृहस्यापि न कृतो राट् त्वमेव हि ३९
किं त्वमे मंदिरं लिप्सुर्मंतव्यं तं भावसे कथं तीर्थराज गृहं गच्छ श्रृणु वाक्यं शुभं वमे ४० मथुरामंडलं साक्षात् मंडलं मे परात्प
रं लोकद्वयात्परं दिव्यं प्रलयेपि न संहृतं ४१ श्रीनंदउवाच इति श्रुत्वा तीर्थराजो विस्मितोभूत्स तत्क्षणः श्चागत्य नत्वा संपूज्य मा
थुरं व्रजमंडले ४२ ततः प्रदक्षिणीकृत्य स्वधामगतवान् पुनः धरायामानमं गाथं पूर्वमेतन्मयादर्शितं ४३ मयातवाग्रेकथितं कि १

1585

भूयः श्रोतुमिच्छसि श्रीनंद उवाच धराधामानभंगार्थे केनपूर्वं प्रदर्शितं ४४ एतन्मे वद गोपेश माथुरं व्रजमंडलं श्रीसनंद उवाच
श्रादौ वाराहकल्पेस्मिन् हरिर्वाराहरूपधृक् ४५ रसातलात्समुद्धृत्य गां वभौ दंष्ट्रया प्रभुः गच्छंतं वारिवृंदेषु भगवंतं रमेश्वरं ४६
दंष्ट्राग्रे शोभिता पृथ्वी प्राह देवं जनार्दनं धरोवाच देवकुत्रस्थले त्वं वै स्थापनं मे करिष्यसि ४७ जलपूर्णं जगत्सर्वं दृश्यते वद हे प्र
भो श्रीवाराह उवाच यदा हृत्वा प्रदृश्यादि भवंत्यो हि गयाजले तदा ते स्थापनं भूयात् पश्यंती गच्छ भूरुहान् श्रीधरोवाच स्थावरा
णां त्वरचना ममोपरि समाश्रिता ४८ अन्यास्ति किं वा धरणी रहहिधारणामयी श्रीसनंद उवाच वदंती सैव ददर्शाग्रे जले हृत्वा मनोह
रान् ५० वीक्ष्य पृथ्वी हरिं प्राह सर्वतो विगतस्पृहा धरोवाच देव कस्मिन्स्थले हृत्वा संति ते ते सपल्लवाः ५१ इदं मनसि मे विघ्नं वद यत्र
पते प्रभो श्रीवाराह उवाच माथुरे मंडले दिव्ये दृश्यंते ये निते विनि ५२ गोलोकभूमिसंयुक्ते प्रलयेपि न संहृते श्रीसनंद उवाच त
तु श्रुत्वा विस्मिता पृथ्वी गतमाना बभूव ह तस्मान्नंद महाभागो व्रजो यं सर्वतोधिकं ५३ श्रुत्वेदं व्रजमाहात्म्यं जीवन्मुक्तो भवेन्नरः
तीर्थराजात्परं विद्धि माथुरं व्रजमंडलं ५४ ॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीवृंदावनखंडे श्रीनंदसनंदसंवादे श्रीवृंदावनोपा
ख्याने नाम प्रथमोध्यायः १ ॥ श्रीनंद उवाच हे सनंद महाप्राज्ञ सर्वतोसि बहुश्रुतः व्रजमंडलमाहात्म्यं वद तस्ले श्रुतं १
गिरिर्गोवर्द्धनो नाम तस्योत्पत्तिं वदस्व मे कस्माद्देवं गिरिवरं गिरिराजं वदंति हि २ यमुनेयं नदी साक्षात् कस्माल्लोकात्समागता त
न्माहात्म्यं वद मे त्वमसि सर्वज्ञो वर ३ सनंद उवाच एकदा हास्तिनपुरे भीष्मं धर्मभृतां वरं पप्रच्छ पांडुरिप्येतं जनानां तोनु भृ
एवंतो ४ परिपूर्णतमः साक्षात् श्रीकृष्णो भगवान्स्वयं असंख्यब्रह्मांडपतिर्गोलोकाधिपतिः प्रभुः ५ भुवो भारावतारायगच्छन्दे।
वो जनार्दनः राधां प्राह प्रिये भीरु गच्छ त्वमपि भूतले ६ श्रीराधोवाच यत्र वृंदावनं नास्ति न यत्र यमुना नदी यत्र गोवर्द्धनो नास्ति
तत्र मे न मनः सुखं ७ श्रीसनंद उवाच वेदनागक्रोशभूमिः स्वधाम्नः श्रीहरिः स्वयं गोवर्द्धनं च यमुनां प्रेषयामास भूपरि ८ वेद
नागक्रोशभूमिः सापि चात्र समागता वर्तविंशद्वनैर्युक्ता सर्वलोकैश्च वंदिता ९ भारतात्पश्चिमदिशि शाल्मलीद्वीपमध्यतः गोव

गर्ग. हृनो जन्म लेभे पत्न्यां द्रोणाचलस्य च १० गोवर्द्धनोपरि सुराः पुष्पवर्षं प्रचक्रिरे हिमालयसुमेर्वाद्याः शैलाः सर्वे समागताः ११
वृं. नत्वा प्रदक्षिणीकृत्य पूजां कृत्वा विधानतः गोवर्द्धनस्य परमां स्तुतिं चक्रुर्महाद्रयः १२ शैला ऊचुः त्वं साक्षात्कृष्णचन्द्रस्य परिपूर्ण-
२ तमस्य च गोलोके गोगणैर्युक्ते गोपीगोपालसंयुते १३ त्वं हि गोवर्द्धनो नाम वृन्दारण्ये विराजसे त्वं नो गिरीणां सर्वेषां गिरिराजोसि
सांप्रतं १४ नमो वृन्दावनांकाय तुभ्यं गोलोकमौलिने पूर्णब्रह्मातपत्राय नमो गोवर्द्धनाय च १५ श्रीसन्नंद उवाच इति स्तुत्वाथ
गिरयो जग्मुः स्वं स्वं गृहं ततः शैलो गिरिवरः साक्षात् गिरिराज इति स्मृतः १६ एकदा तीर्थयायी च पुलस्त्यो मुनिसत्तमः द्रोणाच-
लसुतं श्यामं गिरिं गोवर्द्धनं वरं १७ माधवीलतिकापुष्पफलभारसमन्वितं निर्झरैर्नादितं शांतं कंदरामंगलायनं १८ तपोयो-
ग्यं रत्नमयं शतशृंगं मनोहरं चित्रधातुविचित्रांगं सटंकपदिसंकुलं १९ मृगैः प्रालोमृगैर्व्याप्तं मधुरध्वनिमंडितं मुक्तिप्रदं
मुमुक्षूणां ददर्श स महामुनिः २० तल्लिप्सुर्मुनिशार्दूलो द्रोणपार्श्वं समागतः पूजितो द्रोणगिरिणा पुलस्त्यः प्राह तं गिरिं २१ श्रीपु-
लस्त्य उवाच हे द्रोण त्वं गिरीशोसि सर्वदेवैश्च पूजितः दिव्यौषधीसमायुक्तः सदा जीवनदो नृणां २२ अर्थी न वांछितं प्राप्तः काशीस्थो-
हं महामुनिः गोवर्द्धनं सुतं देहि नान्यं मे त्वत्प्रयोजनं २३ विश्वेश्वरस्य देवस्य काशी नाम्ना महापुरी यत्र पापी मृतः सद्यः परं मोक्षं प्र-
याति हि २४ यत्र गंगा गता साक्षात् विश्वनाथोपि यत्र वै तत्रैनं स्थापयिष्यामि यत्रैको न च पर्वतः २५ गोवर्द्धने तव सुते लतावृंद-
समाकुले तस्मिंस्तपः करिष्यामि जातो यं मे मनोरथः २६ श्रीसन्नंद उवाच पुलस्त्यवचनं श्रुत्वा स्वसुतस्नेहविह्वलः अश्रुपूर्णो
द्रोणगिरिस्तं मुनिं वाक्यमब्रवीत् २७ द्रोण उवाच पुत्रस्नेहाकुलोहं वै पुत्रो मेयमतिप्रियः तेशापभयभीतोहं ददाम्येनं महामु-
ने २८ हे पुत्र गच्छ मुनिना भारते कर्मकोशले देवं फलभते यत्र नृभिर्मोक्षमपि क्षणात् २९ गोवर्द्धन उवाच मुने कथं मां नयसि
लंबितं योजनाष्टकं योजनद्वयमुच्चांगं पंचयोजनविस्तृतं ३० पुलस्त्य उवाच उपविश्य करे मे त्वं गच्छ पुत्र यथासुखं वाहयामि
करेणैव यावत्काशीसमागमः ३१ गोवर्द्धन उवाच मुने यत्र स्थले भूम्यां स्थापनां मे करिष्यति करिष्यामि न चोत्थानं तद्भूम्यां शपथ २

घोमम ३१ पुलस्त्य उवाच अहमा शाल्मलीद्वीपान्मध्ये दीक्षायकौशले तस्यापनं करिष्यामि शापयत्तेमयापथि ३२ श्रीसनं
द उवाच मुनेः करतले तस्मिन्नारुरोह महाबलः प्रणम्य पितरं द्रोणमश्रुपूर्णाकुलेक्षणः ३४ मुनिस्तद्दक्षिणकरे धृत्वा गच्छ
न्शनैः शनैः स्वतेजो दर्शयन्नृणां प्राप्तो भूद्व्रजमंडले ३५ जातिस्मरो गिरिस्तत्र प्राहेदं पथि चिंतयन् परिपूर्णतमः साक्षाच्छ्रीकृ
ष्णो भगवान्स्वयं ३६ असंख्यब्रह्मांडपतिर्व्रजे त्रावतरिष्यति बाललीलां च कैशोरीं चेष्टां गोपालकैः सह ३७ दानलीलां मान
लीलां हरिरत्र करिष्यति तस्मान्मयानरं तव्यं भूमिस्थेयं कलिंदजा ३८ गोलोकाद्राधया साकं श्रीकृष्णस्त्वागमिष्यति कृतकृत्यो भ
त विष्यामि कृत्वाद्दर्शनं परं ३९ इति विचार्य मनसा भूरिभारं ददौ करे तदा मुनिस्तु श्रांतो भूत्पूर्वं गतस्मृतिः ४० कराद्गतायं तं
शैलं निधाय व्रजमंडले लघुशंकाजयार्थं हि गतो भूद्भारपीडितः ४१ कृत्वा शौचं जले स्नात्वा पुलस्त्यो मुनिसत्तमः उत्तिष्ठ वै मु
निः प्राह गिरिं गोवर्द्धनाचलं ४२ नोत्थितं भूरिभाराढ्यं कराभ्यां तं महामुनिः स्वतेजसा बलेनापि गृहीतमुपचक्रमे ४३ मुनिना
संगृहीतोपि गिरिराजं गिरा दृढया न चचाल गुलीकिंचित्तदापि द्रोणनंदनः ४४ अथ पुलस्त्य उवाच गच्छ गच्छ गिरिश्रेष्ठ भारं माकुरु
माकुरु मयाज्ञातोसि रुष्टस्त्वं शुभि शापो वदाशुमे ४५ गोवर्द्धन उवाच मुने न मे त्र दोषो स्ति त्वया मे स्थापना कृता करिष्यामि न
चोत्थानं त्वया मे शपथः कृतः ४६ श्रीसनंद उवाच पुलस्त्यो मुनिशार्दूलः क्रोधात्प्रज्वलितेंद्रियः स्फुरदोष्ठो द्रोणपुत्रं शशाप विग
तोद्यमः ४७ पुलस्त्य उवाच गिरे त्वयातिधृष्टेन न कृतो मे मनोरथः तस्मात्तु तिलमात्रं हि नित्यं त्वं क्षीणतां व्रज ४८ श्रीसनंद उ
वाच काशीं गते पुलस्त्यर्षौ वर्षं गोवर्द्धनो गिरिः नित्यं संक्षयते नंद तिलमात्रं दिने दिने ४९ यावद्भागीरथी गंगा यावद्गोवर्द्धनो गिरिः
तावत्कलेः प्रभावस्तु भविष्यति न कर्हिचित् ५० गोवर्द्धनस्य प्रकटं चरित्रं नृणां महापापहरं पवित्रं मया तवाग्रे कथितं विचित्रं
मुमुक्तिदं श्रीरुचिरं नचित्रं ५१ ॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीवृंदावनखंडे गोवर्द्धनोत्पत्तिकथनं नाम द्वितीयोध्यायः २ ॥
श्रीसनंद उवाच गोलोके हरिणा त्यक्ता कालिंदी सरितां वरा कृष्णे प्रदक्षिणीकृत्य यांतमस्मुदिता भवत् १ तदेव विरजा साक्षात्कृग

1588

ग॰ ब्रह्मद्रवोद्भवा हेनयोयमुनायांतसंप्रलीनेवभूवतुः १ परिपूर्णतमंकृष्णंतस्मात्कृष्णस्यनंदनात् परिपूर्णतमस्यापिपट्टराज्ञी
सं॰ विदुर्बुधाः ३ ततोवेगेनमहताकालिंदीसरितांवरा विभेदविरजावेगंकुंजद्वारविनिर्गता ४ असंख्यब्रह्मांडचयंस्पृष्ट्वाब्रह्म
३ द्रवंगता भिंदतीजज्जलंदीर्घंस्ववेगेनमहानदी ५ वामपादांगुष्ठनखभिन्नब्रह्मांडमस्तके श्रीवामनस्यविवरेब्रह्मद्रवसमाकु।
ले ६ तस्मिन्श्रीगंगयासार्द्धंप्रविष्टाभूत्सरिद्वरा वैकुंठंचाजितपदंसंप्राप्यध्रुवमंडलं ७ ब्रह्मलोकमभिव्याप्यपतंतीब्रह्म·
मंडलात् ततःसुराणांशतशोलोकाल्लोकंजगामह ८ ततःप्रयातवेगेनसुमेरुगिरिमूर्द्धनि गिरिकूटाननिक्रम्यभित्वागंड।
शिलातटान् ९ सुमेरोर्दक्षिणादिशांगतमभ्युदिताभवत् ततःश्रीयमुनासाक्षाच्छ्रीगंगायाविनिर्गता १० गंगानुप्रययौशैलंहिम
वंतंमहानदी कृष्णानुप्रययौशैलंकलिंदंप्राप्यसापदा ११ कालिंदीतिसमाख्याताकलिंदप्रभवायदा कलिंदगिरिसंभूतगंड
शैलतटानुदरुतान् १२ भित्वालुठंतीभूखंडेकृष्णावेगवतीसती देशान्पुनंतीकालिंदीप्रापवान्खांडवेवने १३ परिपूर्णतमंसा
क्षात्श्रीकृष्णंवरमिच्छती धृत्वावपुःपरंदिव्यंतपस्तेपेकलिंदजा १४ पित्राविनिर्मितेगेहेजलेवापिसमास्थिता ततोवेगेनका
लिंदीप्राप्ताभूद्व्रजमंडले १५ वृंदावनसमीपेचमथुरानिकटेशुभे श्रीमहावनपार्श्वेचसैकतेरमणस्थले १६ श्रीगोकुलेचय
मुनायूथीभूत्वातिसुंदरी श्रीकृष्णचंद्रासार्थंनिजवासंचकारह १७ अथोव्रजाद्व्रजंतीसाव्रजविच्छेदविह्वला प्रेम्णानंदाश्रुसं।
युक्ताभूत्वापश्चिमवाहिनी १८ ततस्त्रिवारंवेगेनगत्वाथव्रजमंडले देशान्पुनंतीप्रययौप्रयागंतीर्थसंगमं १९ पुनःश्रीगंग·
यासार्द्धंक्षीराब्धिंसाजगामह देवाःसर्वेपुष्पाणांववृषुर्दिशिजयध्वनिं २० कृष्णाश्रीयमुनासाक्षात्कालिंदीसरितांवरा समुद्रमे
त्यश्रीगंगांप्राहगद्गदयागिरा २१ श्रीयमुनोवाच हेगंगेत्वंतुधन्यासिसर्वब्रह्मांडपावनि कृष्णपादाब्जसंभूतासर्वलोकैकवंदि।
ता २२ ऊर्द्ध्वंयास्यसिहरेर्लोकंगच्छत्वमपिहेशुभे त्वत्समानंचदिव्यंचनभूतानभविष्यति २३ सर्वतीर्थमयीगंगातस्मात्वांप्रणमा।
म्यहं यत्किंचिद्धाप्रकथितंतत्क्षमस्वसुमंगले २४ श्रीगंगोवाच हेकृष्णेत्वंतुधन्यासिसर्वब्रह्मांडपावनी कृष्णवामांगसंभूताप ३

ष्णानंदस्वरूपिणी २५ परिपूर्णतमा साक्षात्सर्वलोकैकवंदिता परिपूर्णतमस्यापि श्रीकृष्णस्य महात्मनः २६ पट्टराज्ञी परा कृ
ष्णे कृष्णसंतापशमनाम्यहं तीर्थैर्देवैर्दुर्लभा त्वं गोलोकेपि च दुर्घटा २७ अहं याम्यामि पाताले श्रीकृष्णस्याज्ञया शुभे त्वद्वियोगात्
राहं वै यानं कर्तुं न वत्सला २८ दुःखीभूता भविष्यामि श्रीव्रजे रासमंडले यत्किंचिन्मे प्रकथितं तत्तत्समस्व हरिप्रिये २९ सनंदउ
वाच इत्थं परस्परं नत्वा हेनयोपपतद्दिने लोकान्यविद्रं कुर्वती पाताले सा सरिद्वरा ३० सापि भोगवती नाम्ना च भोगवती व
ने यज्जलं सवित्रिनयनः शिवो मूर्द्ध्नि बिभर्ति हि ३१ अथ कृष्णा स्ववेगेन भित्वा सप्ताब्धिमंडले सप्तद्वीपमहीपृष्ठे लुठंती वेगवत्तरा २१
गत्वा स्वर्णमयीभूमिं लोकालोकाचलं गता तस्माद्रंगं तु शैलानां तटं भित्वा कलिंदजा ३३ आब्रह्मलोकं लोकांस्तान्भित्वा व्याप्य हरेः
पदं ब्रह्मांडरंध्रे श्रीब्रह्मद्रवयुक्तेन समेत्य सा ३४ कृष्णवर्णा प्रवर्षन्ती देवेषु प्रणमत्स्व च पुनः श्रीकृष्णगोलोकमारुरोह सरिद्वरा ३५
कलिंदगिरिनंदिनीत्वचरित्रमेतत्तु भं श्रुत्वैव परिपाति तं भुवि तनोति सन्मंगलं ३६ जनोपि यदि धारयेत्किल पदे त्रयोनिप्रशः
सुधाति परमं पदं निजनिकुंजलीलावृते ३७ ॥ इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे तृतीयोध्यायः ३ ॥ नारदउवाच
सनंदस्य वचः श्रुत्वा गतं नंदः स्वसुयतः सर्वैर्गोपगणैः सार्द्धं मुदितोभून्महामनाः १ यशोदया च रोहिण्या सर्वगोपगणैः सह प्र
स्थे वीरजनैर्मंडितो विप्रमंडलैः २ गोभिश्च शकटैर्युक्तो वृद्धबालैः सधान्यगैः गोपकैर्गीयमानैश्च शंखदुंदुभिनिःस्वनैः ३ पुत्रा
भ्यां कृष्णरामाभ्यां नंदराजो महामतिः रथमारुह्य हे राजन् वनं वृंदावनं ययौ ४ वृषभानुवरो गोपो गजमारुह्य भार्यया श्रीके
लीलां सुतां राधां गीयमानैश्च गायकैः ५ मृदंगतालवीणानां वेणूनां कलनिःस्वनैः गोपालगोगणैः सार्द्धं वृंदारण्यं जगाम ह ६ उ
पनंदास्तथा नंदास्तथा च वृषभानवः सर्वैः परिकरैः सार्द्धं मुदा वृंदावनं ययुः ७ वृंदावने समाविश्य गोपाः सर्वे सहानुगाः गो
पान्विधाय वसतीः वासं चक्रुरितस्ततः ८ सभामंडपसंयुक्तं मतुर्गोपरिखायुतं चतुर्योजनविस्तीर्णं पुरं नंदश्चकार ह ९ शाका
रपरिखायुक्तं विचित्रभवनान्वितं योजनत्रयविस्तीर्णं सप्तद्वारसमन्वितं १० सरोवरैः परिवृतं राजमार्गमनोहरं सहस्रकुंजे

गर्ग. वपुरं वृषभानुरचीक्लृपत् ११ श्रीकृष्णं नंदनगरं वृषभानुपुरेऽर्भकैः चकार क्रीडनपरो गोपीनां प्रीतिमावहन् १२ अथ वृंदाव
वृं. ने राजन् सर्वगोपालसंमतौ बभूवतुर्वत्सपालौ रामकृष्णौ मनोहरौ १३ चारयामासतुर्वत्सान् ग्रामसीम्न्यर्भकैः सह कालिंदी
४ निकटे पुण्ये पुलिने रामकेशवौ १४ प्रचलंतौ निकुंजेषु संप्रलीनाविततस्ततः रिंगमाणौ च कुत्रापि नंदंतौ चेरतुर्वने १५ किंकि
णीजालसंयुक्तौ स्फुरन्मंजीरनूपुरौ पीतवासःपरिकरौ हारकेयूरभूषितौ १६ लेपणैः क्षिपतौ बालैः वंशीवादनतत्परौ मुखेन
किंकिणीशब्दं कुर्वद्भिर्बालकैः स्तुतौ १७ धावंतौ पतितिभिः छायां रेजतू रामकेशवौ मयूरपिच्छसंयुक्तौ पुष्पपल्लवभूषितौ १८
एकदा वत्सवृंदेषु प्राप्तं वत्सासुरं नृप कंसप्रणोदितं ज्ञात्वा शनैस्तत्र जगाम ह १९ धावन्तो येषु सर्वेषु लांगूलं चलयन्मुहुः दै
त्यः पश्चिमपादाभ्यां हरिं मेसेन ताडह २० पलायितेषु बालेषु कृष्णस्तं पादयोर्द्वयोः गृहीत्वा भ्रामयित्वाथ पातयामास भूतले २१
पुनर्लीलाकराभ्यां तं कपित्थे प्राहिणोद्धरिः तदा भूसंगते दैत्ये कपित्थोपि महाद्रुमः २२ कपित्थान्पातयामास तदद्भुतमिवाभ
वत् विस्मितेषु च बालेषु साधुसाध्विति वादिषु २३ दिवि देवा जयारावान् पुष्पवर्षं प्रचक्रिरे तद्देहात्स्य महाज्योतिः कृष्णे लीनं बभू
व ह २४ बहुलाश्व उवाच अहो पूर्वं स कृत्कस्य को यं वत्सासुरो मुने श्रीकृष्णे लीनतां प्राप्तः श्रीप्रपूर्णे परात्परे २५ नारद उवाच
मुरपुत्रो महादैत्यः प्रमीलो नाम देवजित् वसिष्ठस्याश्रमे प्राप्तो नंदिनीं गां ददर्श ह २६ तल्लिप्सुर्ब्राह्मणो भूत्वा ययाचे गां मनोहरां
गी× तूष्णीं स्थिते गोरुवाच वसिष्ठे दिव्यदर्शने २७ श्रीनंद उवाच मुनीनां गां समाहर्तुं भूत्वा विप्रः समागतः दैत्योसि मुरजस्तस्माद्भो वत्सो
भवदुर्मते २८ नारद उवाच तदैव वत्सरूपो भून्मुरपुत्रो महासुरः वसिष्ठं गां परिक्रम्य नत्वा ग्राहीत्युवाच ह २९ गौरुवाच द्वापरांते
महादैत्य वृंदारण्ये यदा नव गोवत्सेषु गतस्यापि तदा मुक्तिर्भविष्यति ३० नारद उवाच परिपूर्णतमे साक्षात्कृष्णे पतितपावने त
स्माद्वत्सासुरो दैत्यो लीनो भून्नहि विस्मयः ३१ ॥ इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे चतुर्थोऽध्यायः ४ ॥ श्रीनारद उवाच
एकदा चारयन्वत्सान् सरामो बालकैर्हरिः यमुनानिकटे प्राप्तं बकं दैत्यं ददर्श ह १ श्वेतपर्वतसंकाशो बृहन्मादोघनध्वनिः प ४

1591

लायितेष्ववालेषु वज्रं तेजो ग्रसद्धरिं २ कृष्णं महाबकग्रस्तं दृष्ट्वा ते व्रजवासिनः रुदंतो बालकाः सर्वे गतप्राणा इवाभवन् हाहाकारं त
दा कृत्वा देवाः सर्वे समागताः ३ इंद्रो वज्रं तदानीत्वा तेन ताडमहाबकं तेन घातेन पतितो मूर्छितो घटिकाद्वयं ४ विधुन्वन् स तनुं वे।
गाज्जृंभितः पुनरुत्थितः नमस्कारं तदा दैत्यो जगर्ज घनवद्बली ५ त्रिलोचनं त्रिशूलेन तं जघान महासुरं छिन्नैकपक्षो दैत्योपि
न मृतोपि भयंकरः ६ वायव्यास्त्रेण वायुस्तं संजघान बकं ततः उच्चचाल बकस्तेन पुनस्तत्र स्थितोभवत् ७ यमस्तं यमदंडेन
ताडयामास चाग्रतः तेन दंडेन न मृतो बको वै चंडविक्रमः ८ दंडोपि भग्नतां प्रागात्स तत्रो नाभवद्बकः तदेव चाग्रतः प्राप्य चंडं
प्रचंडविक्रमः ९ शतघ्नीं वै बके दैत्ये संजघान धनुर्द्धरः नीतोः पतगतैर्वीर्णोर्न ममार बकस्ततः १० धनदस्तं च खड्गेन सती
क्ष्णेन जघान ह छिन्नद्वितीयपक्षोभूत् न मृतो दैत्यपुंगवः ११ नीहारास्त्रेण तं सोमः संजघान महाबकं शीतार्तो मूर्छितो दै
त्यो न मृतः पुनरुत्थितः १२ आग्नेयास्त्रेण तं त्वग्निः संजघान महाबकं भस्मांगो नाभवद्दैत्यो न ममार महाबलः १३ अपांपतिस्तं
पाशेन बध्वा कोविचकर्ष ह कर्षणात्स महान्यासः छिन्नोभून्न मृतस्सः १४ ततो गदया तं वै भद्रकाली तरस्विनी मूर्छितस्तत्प्र
हारेण परं कश्मलतां ययौ १५ ततो मूर्छां समुत्थाय विधुन्वंस्तनुं पुनः जगर्ज घनवद्धीरो बको दैत्यो महाबलः १६ तदा शक्तिध
रः शक्तिं तस्मै चिक्षेप सत्वरः तदेकपादो भग्नोभून्न मृतः पक्षिणां वरः १७ तदा क्रोधेन महता धावन्दैत्यः स्फुरित्स्वनः देवान्विद्रा
वयामास तीक्ष्णपातं डयामध्ये १८ अग्रे पलायितान्देवाननुधावद्बकोवरे पुनस्तत्रागमद्दैत्यो नादयन्मंडलं दिशां १९ तदा देव
र्षयः सर्वे सर्वे ब्रह्मर्षयो द्विजाः श्रीनंदनंदनायाशु सफलं चाशिषं ददुः २० तदैव कृष्णस्तन्मध्ये तातानवाङ्गरज्वलन् बकबद्धं कृ
ष्णं तरसा त्वत्कंठो महाबकः २१ पुनः कृष्णं समादन्ते तीक्ष्णपातं डयागतः पुच्छं गृहीत्वा तं कृष्णः पोथयामास भूतले २२ पुनरु
त्थाय तं डं स्वं प्रसार्य विस्थितं बकं ददार तं डे हस्ताभ्यां कृष्णो बालो गजो यथा २३ तदा मृतस्य दैत्यस्य ज्योतिः कृष्णं समाविशत् दे
वता ववृषुः पुष्पैर्जयारवैः समन्विताः २४ गोपाला विस्मिताः सर्वे कृष्णं संश्लिष्य सर्वतः ऊचुस्ते कुशली भूतो मुक्तो मृत्युमुखात्स

गर्गं० वृं० ५ खे २५ एवंकृष्णो बकं हत्वा सबलो बालकैः सह गोवत्सैर्हर्षितो गायन्नाययौ राजमंदिरं २६ परिपूर्णतमस्यापि श्रीकृष्णस्य महात्म
नः जगुर्गृहे गते बालाः कृतं देवेन विस्मिताः २७ बहुलाश्व उवाच कोयं दैत्यः पूर्वकाले कस्मात्केन बकोभवत् श्रुत्वा ब्रह्मणि सर्वे
शे श्रीकृष्णे लीनतां गतः २८ नारद उवाच हयग्रीवसुतो दैत्य उत्कलो नाम हे नृप रणे महाब्धिनिर्जित्य शक्रछत्रं जहार ह २९ त
थान्येषां नृपाणां च राज्यं हृत्वा महाबलः चकार वर्षाणि शतं राज्यं सर्वविभूतिमत् ३० एकदा विचरन्दैत्यः सिंधुसागरसंगमे जा
जलेर्मुनिसिद्धस्य पर्णशालसमीपतः ३१ जलेनिक्षिप्य वडिशं मीनानाकर्षयन्मुहुः निषेधितोपि मुनिना नैव मन्यत दुर्मतिः ३२
तस्मै शापं ददौ सिद्धो जाजलिर्मुनिसत्तमः बकवत्त्वं झषानत्सि त्वं बको भव दुर्मते ३३ तत्क्षणाद्बकरूपोभूद्भ्रष्टतेजा गतस्मयः प त
तितः पादयोस्तस्य नत्वा शरदकृतांजलिः ३४ उत्कल उवाच न जाने ते परं चंडं मुने मां पाहि जाजले साधूनां भवतां संगो मोक्षदा
यो विदुः ३५ मित्रे शत्रौ समे माने समाने हेमलोष्टयोः सर्वे दुःखे समा ये वै ब्राह्मणाः साधवश्च ये ३६ किं किं न जातं महतां दर्श
नात्को मुने तृणं पारमेष्ठ्यं च साम्राज्यमैंद्रं योगपदं भवेत् ३७ जाजले मुनिशार्दूल चैव यत्किंचिद्भूभुजैः साधूनां कृपया साक्षा
त्सर्वं ब्रह्मा च लभ्यते ३८ नारद उवाच तदा प्रसन्नः समुनिर्जाजलिस्तमुवाच ह षष्टिवर्षसहस्राणि तपस्तप्तं चयेन वै ३९ जा
जलिरुवाच वैवस्वतांतरे शाभिष्टाविंशतिमे युगे द्वापरांते भारते च माथुरे व्रजमंडले ४० परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवा
न्स्वयं वृंदावने गा वा वत्सानुचारयन्विचरिष्यति ४१ तदा तन्मयतां कृष्णे यास्यसि त्वं न संशयः हिरण्याक्षादयो दैत्या वैरेणा
पि परं गताः ४२ नारद उवाच इत्थं बकासुरो दैत्यः उत्कलो जाजलेर्वरात् श्रीकृष्णे लीनतां प्राप्तः सत्संगात्किं न जायते ४३ ॥
इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे पंचमोध्यायः ५ ॥ नारद उवाच एकदा बालकैः साकं गोवत्सांश्चारयन्हरिः कालिं
दीनिकटे रम्ये बालक्रीडां चकार ह वत्सासुरो नाम महान्दैत्यस्तत्र स्थितोभवत् क्रोशदीर्घं वपुः कृत्वा प्रसार्य मुखमंडलं २ दूरा
त्पर्वताकारं वीक्ष्य वृंदावने वने गोपा जग्मुर्मुखे तस्य वत्सैः कृतजलभ्रमे ३ तद्दृष्ट्वार्थं च सबलस्तन्मुखे प्राविशद्धरिः निर्गीतोपि ५

सवत्सेषु बालेषु सहिरूपिणा ४ हाहाशब्दं सुराणां तु दैत्यानां सर्वपर्वहि कंसोवदुःखं वै राजन् ततानाद्यो दरे ततः ५ ततस्तारोध
गाःप्राणाः शिरोभित्वा विनिर्गताः तद्रूपे निर्गतः कृष्णो बालैर्वत्सैश्च मैथिल ६ सवत्सकान् शिशून् दृष्ट्वा जीवयामास माधवः तज्ज्यो
तिः श्रीघनश्यामे लीनं जातं तडिद्यथा ७ ततैव वहुर्देवाः पुष्पवर्षाणि पार्थिव कोयं दैत्यः पूर्वकाले श्रीकृष्णे लीनतां गतः अहोवै
रानुवंधेन शीघ्रं दैत्याद्धरिं गतः ८ श्रीनारद उवाच शंखासुरसुतो राजन्नघो नाम महाबलः युवातिसुंदरः साक्षात्कामदेवापरः
अष्टावक्रं मुनिं यांतं विरूपं मलयाचले दृष्ट्वा जहास तं सद्यः कुरूपोयमिति ब्रुवन् ९ तं शशाप महादुष्टं त्वं सर्पो भव दुर्मते कुरू
पाद्वक्रगात्रातिः सर्पाणां भूमिमंडले ११ तदा दैत्यो निपतितो दैत्यं दीनं गतस्मयं दृष्ट्वा प्रसन्नः सन्मुनिर्वरं तस्मै ददौ पुनः १२ अष्टाव
क्र उवाच कोटिकंदर्पलावण्यः श्रीकृष्णस्तव वोदरे यदागतः सर्परूपात्त्वपापान्मुक्तिर्भविष्यति १३ नारद उवाच अष्टावक्रस्य शापे
न सर्पो भूत्वाघासुरः तद्रूपात्परमं मोक्षं गतो योगैश्च दुर्लभं १४ वत्सान्वकसुतान्मुक्तं तमोमुक्तिं त्वघासुरं कृत्वा कतिदिनैः कृ
ष्णं यशोदाभूद्भयातुरा १५ कलावती रोहिणी च गोपी गोपान्वयोधिकान् वृषभानुवरं गोपं नंदराजं व्रजेश्वरः १६ नवोपनंदान्नंदा
न्वृषभानून्व्रजे षट् समाहूय नदीश्चैव वचः शाह यशोमती १७ यशोदा उवाच किं करोमि क्व गच्छामि कल्याणं मे कथं भवेत् म
त्तनैव बहवो रिष्टा आगच्छंति क्षणे क्षणे १८ पूर्वं महावने त्यक्त्वा वृंदारण्ये गता वयं एतत्त्यक्त्वा क्व यास्यामः देशो वदतु निर्भये १९ चंच
लोयं बालको मे क्रीडन् दूरे प्रयाति हि बालकाश्चंचलाः सर्वे न मन्यंते वचो मम २० बकासुरश्च मे बालं नीत्वा तं डोग्रसद्वली तस्मा
त्कृतं तु जगदाद्यार्भके दीनमघासुरः २१ वत्सासुरश्च लिङ्गोसुः सोपि दैवेन मारितः वत्सार्थं स्वगृहाद्बालं न वहिः कारयाम्यहं २२
इत्थं वदंती सततं रुदंती यशोमती वीक्ष्य जगाद नंदः आश्वासयामास सगर्गवाक्यैर्धर्मार्थविद्धर्मभृतां वरिष्ठः २३ श्रीनंद उवाच ग
र्गवाक्यं त्वया सर्वं विस्मृतं हे यशोमति ब्राह्मणानां वचः सत्यं नासत्यं भवति क्वचित् २४ तस्माद्दानं प्रकर्तव्यं सर्वारिष्टनिवारणं
दानात्परं तु कल्याणं न भूतो न भविष्यति २५ श्रीनारद उवाच तदा यशोदा विप्रेभ्यो नवरत्नं महाधनं सालंकारं स्वबालस्य सबल

1692

1594

गर्गे. स्वदर्शनेन्य २९ अथ तं वृषभानोर्वरवालं तं मनोहरं हिल्लतमन्नभाराणां नंदो दाने ददौ ततः ३० ॥ इति श्रीमद्गर्गाचार्यसंहिता
वृं. यां वृंदावनखंडे षष्ठोऽध्यायः ६ ॥ श्रीनारद उवाच गोपेच्छया रामकृष्णौ गोपालौ तौ बभूवतुः गाश्चारयंतौ गोपालैर्वयस्यैश्चैव तद्वने १
८ अग्रेऽग्रे पृष्ठे तथा गावश्चरंत्यः पार्श्वयोर्द्वयोः श्रीकृष्णस्य बलस्यापि पश्यंत्यः सुंदरं मुखं १ घंटामंजीरझंकारं कुर्वंत्यस्त्वाश्च तस्ततः किं
किणीजालसंयुक्ता हेममालालसत्कलाः २ मुक्तागुच्छैर्बर्हिपुच्छैर्लसत्पुच्छाच्छकेसराः स्फुरत्नानवरत्नानां भालपुष्पैर्विराजिताः ध
शृंगयोरंतरा राजन्शिरोमणिमनोहराः हेमरश्मिप्रभास्फूर्जद्घंटापार्श्वप्रवेष्टिताः ५ आरक्ततिलकाः काश्चिद्रक्तपुच्छारुणास्त्वयः
कैलासगिरिसंकाशाः शीलरूपा महागुणाः ६ सवत्सा मंदगामिन्यः कृष्णो भारेण मैथिल कुंडोध्न्यः पाटलाः काश्चिल्लसंत्यो भवन्मृते
यः ७ काश्चित्पीता विचित्राश्च श्यामाश्च हरितास्तथा ताम्राधूम्राश्च घनश्यामा सघनश्यामे गते तद्गणाः ८ लघुशृंग्यो दीर्घशृंग्य उच्चशृंग्यो
वृषैः सह मृगशृंग्यो वक्रशृंग्यः कपिला मंगलायनाः ९ शार्दूलकोमलेशांतवीक्ष्यस्तोपि वने वने कोटिशो कोटिशो गावश्चरंत्यः ।
कृष्णपार्श्वयोः १० पुण्यं श्रीयमुनातीरं तमालैः श्यामलं वनं नीपैर्निंबैः कदंबैश्च श्यामलैः पनसैः द्रुमैः ११ कदलीकोविदाराम्रैर्जं
बूबिल्वैर्मनोहरैः अश्वत्थैश्च कपित्थैश्च माधवीभिश्च मंडितं १२ वभौ वृंदावनं दिव्यं वसंततरुमनोहरं नंदनं सर्वतोभद्रं दितिपंश्चै
त्ररथं वने १३ यत्र गोवर्द्धनो नाम सन्निर्झरदरीयुतः रत्नधातुमयः श्रीमान्मंदारवनसंकुलः १४ श्रीखंडवटीरंभादेवदारुवटै
र्वृतः पलाशप्लक्षाशोकैश्चारिष्टार्जुनकदंबकैः १५ पारिजातैः पटालैश्च चंपकैः परिशोभितं परितो जालकुंजाध्यानः शालैरि
ट्यवैर्वृतः १६ कलकंदैः कोकिलैश्च पुंस्कोकिलमयूरभृत् गाश्चारयन्नुतत्र कृष्णो विचचार वने वने १७ वृंदावने मधुवने पार्श्वे
तालवनस्य च कुमुदवने बाहुले च दिव्ये कामवने परे १८ बृहत्सानुगिरेः पार्श्वे गिरेर्नंदीश्वरस्य च सुंदरे कोकिलवने कोकिलध
निसंकुले १९ रम्ये कुशवने सौम्ये लताजालसमन्विते महापुण्ये भद्रवने भांडीरोपवने नृप २० लोहार्गले च यमुनातीरे तीरे ८
वने वने पीतवासः परिकरो नटवेषो मनोहरः २१ वेत्रभृद्वादयन्वंशीं गोपीनां प्रतिमावहन् मयूरपत्रभृन्मौलिः स्रग्वी कृष्णो

1595

वभोन्नृप २२ अथैकृत्वागतां हृद्दृष्ट्वा सायंकाले स्वयं हरिः गौः संशाह्य गन्वंशीश्रीनंदव्रजमाविशत् २३ वेणुवंशीध्वनिकरा श्री
वंशीवटमार्गतः गोरजोभिर्नभो व्याप्तं वीक्ष्य गेहात् विनिर्गताः २४ हरीकतें स्नापिवामामाहतें स्वसुन्नमं विस्मृतं न समर्था
स्नंदहृं गोप्यः समाययुः २५ संकोचवीथीषु नरसंगृहीतः शनैश्चलन्गोगणसंकुलासु सिंहावलोकैर्गजबाललीलैर्वधूजनैः पं
कजपत्रनेत्रः २६ सुमंडितैर्मैथिलगोरजोभिर्नीलंपरं कुंतलमादधानः हेमांगदी मौलिविराजमानः आकर्णवक्रीकृत दृष्टि
वाणः २७ गोधूलिभिर्मंडितकुंदहारः कर्णोपरिस्फूर्जितकर्णिकारः पीतांबरो वेणुनिनादकारः पातप्रभुर्वीकृतभूमिभारः २८
इति श्रीमद्गर्गाचार्यसंहितायां वृंदावनखंडे कृष्णगोचारणसंवादवर्णनं नाम सप्तमोऽध्यायः ७ ॥ श्रीनारद उवाच एकदा सब
लः कृष्णः श्रावयन्नाममनोहरः गोपालैः सहितः सर्वैर्ययौ तालवनं वनं १ धेनुकस्य भयाद्गोपा न गतास्ते वनांतरं कृष्णोपि न ग
तस्तत्र वलयकोटदर्शह २ नीलांबरकटौ वध्वा बलदेवो महाबलः परिपक्वफलार्थं हि नह्येनैविचचार ह ३ बाहुभ्यां कंपय
न्तालान्फलसंचं निपातयन् गजोनिनिर्भयः साक्षादनंतो नंतविक्रमः ४ फलानां पतनं शब्दं श्रुत्वा क्रोधावृतः खरः मथा
ङ्क्ष्वापकृतडुहो भीमंकं समस्वोवली ५ आययौ सन्मुखे योद्धुं बलदेवस्य धेनुकः बलेपश्चिमपादाभ्यां निहत्योरसि सत्वरं ६
वकारखरशब्दं च परिधावन्मुहुर्मुहुः गृहीत्वा धेनुकं शीघ्रं बलः पश्चिमपादयोः ७ चिक्षेप तालवृक्षे च दस्तैनैकेन लीलया
तेन भग्नः स तालोपि तालानन्यान्स्थितान्बहून् ८ पातयामास राजेंद्र तदद्भुतमिवाभवत् पुनरुत्थाय दैत्येंद्रो बलं जग्राह रो
षतः ९ योजनं नोदयामास गजं प्रतिगजो यथा गृहीत्वा तं बलः सद्यो भ्रामयित्वाथ धेनुकं भूपृष्ठे पोथयामास मूर्छितं भग्न
मस्तकं तत्क्षणे न पुनरुत्थाय क्रोधसंयुक्तविग्रहः ११ मूर्छिं कृत्वा वनः शृंगं धृत्वा रूपं भयंकरं गोपान्विद्रावयामास शृंगैस्ती
तोः भयंकरैः १२ अथ पलायितान्सर्वान्दृष्ट्वा वसुमदोत्कटः श्रीदामा तं च दंडेन स्तबलो मुष्टिना तथा १३ स्तोकः पाशेन तं दैत्यं
संतताड महाबलः वेपणो नार्जुनोंशुश्च दैत्यं लष्टिकया त्वरा १४ विशालर्षभ पत्याशु पादेन स्वबलेन च तेजस्वीत्वर्हं चंदेण

गर्गं॰ देवपुरस्थस्य पेटकैः १५ वरूपधरः कंडकेन संततनादमहाखरं अथ कृष्णोपि तं नीत्वा हस्ताभ्यां धेनुकासुरं १६ भ्रामयित्वा क्षिपेत्तगि
वृं रेर्गोवर्द्धनो हरिः श्रीकृष्णस्य प्रहारेण मूर्छितो घटिकाद्वयं १७ पुनरुत्थाय स्वतनुं विधुन्वन्धारयन्मुखं शृंगाभ्यां श्रीहरिं नीत्वा धाव
७ न्दैत्यो नभोगतः १८ चकार तेन वै युद्धं मूर्द्धवैलक्षयोजनं गृहीत्वा धेनुकं दैत्यं श्रीकृष्णो भगवान्स्वयं १९ चिक्षेप यो भूमिमध्ये चू।
र्णितास्थिः समूर्छितं पुनरुत्थाय शृंगाभ्यां नादं कृत्वातिभैरवं २० गोवर्द्धनं समुत्पाट्य श्रीकृष्णे प्राहिणोत्खरः गिरिं गृहीत्वा श्रीकृष्णः प्रा
क्षिपत्तस्य मस्तके २१ दैत्यो गिरिं गृहीत्वाथ श्रीकृष्णे प्राहिणोद्बली कृष्णो गोवर्द्धनं नीत्वा पूर्वस्थाने समादिपत् २२ पुनर्धावन्महादैत्यः
शृंगाभ्यां दारयन्भुवं बलं पश्चिमपादाभ्यां ताडयित्वा जगर्ज ह २३ तन्नादेन ब्रह्मांडं पेजन्भूखंडमंडले हस्ताभ्यां संगृहीत्वा तं बलदे।
वो महाबलः २४ भूपृष्ठे पोथयामास मूर्छितं भग्नमस्तकं पुनस्तत्ताडनैर्दैत्यं मुष्टिनाच्युतपूर्वजः २५ तेन मुष्टिप्रहारेण सद्यो वै निध
नं गतः तदैव ववृषुर्देवाः पुष्पैर्नंदनसंभवैः २६ देहाद्विनिर्गतः सोपि घनश्यामसुंदरविग्रहः स्रग्वी पीतांबरो देवो वनमालाविभूषितः २०
श्रीकृष्णं सबलं नत्वा परिक्रम्य स्थितोभवत् तदैव सद्यो गोलोकादागतोभून्महारथः २८ लक्षपार्षदसंयुक्तः सहस्रध्वजशोभितः
सहस्रचक्रध्वनिभृद्धयायुतसमन्वितः २९ ललच्चामरशोभाढ्यो हंसवर्णोतिरत्नभृत् दिव्ययोजनविस्तीर्णो मनोयायी मनोहरः ३०
किंकिणीजालसंयुक्तो घंटामंजीरमंडितः हरिं प्रदक्षिणीकृत्य सबलं दिव्यरूपधृक् ३१ दिव्यं रथं समारुह्य द्योतयन्मंडलं दिशां
जगाम दैत्यो हे राजन् गोलोकं प्रकृतेः परं ३२ श्रीकृष्णो धेनुकं हत्वा सबलो बालकैः सह तत्र शस्त्रप्रगायद्भिर्वेभौ गोकुलगोगणैः ३३
श्रीराजोवाच मुनेः शक्तिः कथं प्राप्तः पूर्वं को धेनुकासुरः कथं खरत्वमापन्न एतन्मे ब्रूहि तत्त्वतः ३४ नारद उवाच वैरोचनेर्बलेः पु
त्रो नाम्ना साहसिको बली नारीणां दशसाहस्रैः रेमे वै गंधमादने ३५ वादित्राणां नूपुराणां शब्दोभूत्तद्वने महान् गुहायामास्थित
